बुध्यमानोऽप्रबुद्धेन समतां याति मैथिल ॥ संगधर्मा भवत्येष निःसंगात्मा नराधिप ॥ १९ ॥ निः
संगात्मानमासाद्य षड्विंशमजमव्ययम् ॥ विभुस्त्यजति चाव्यक्तं यदा त्वेतद्विबुध्यते ॥ २० ॥ च
तुर्विंशमसारं च षड्विंशस्य प्रबोधनात् ॥ एष ह्यप्रतिबुद्धश्च बुध्यमानस्तु तेऽनघ ॥ २१ ॥ प्रोक्तो
बुद्धस्तु तत्त्वेन यथाश्रुतिनिदर्शनात् ॥ नानात्वैकत्वमेतावद्द्रष्टव्यं शास्त्रदर्शनात् ॥ २२ ॥ म
शकोदुंबरे यद्वदन्यत्वं तद्वदेतयोः ॥ मत्स्योदके यथा तद्वदन्यत्वमुपलभ्यते ॥ २३ ॥ एवमे
वावगंतव्यं नानात्वैकत्वमेतयोः ॥ एतद्धि मोक्ष इत्युक्तमव्यक्तज्ञानसंहितम् ॥ २४ ॥

धानमसंगात्वे हेतुः स्वरान्मानायोपशमे देव एक इति श्रुत्यनुसारेणाप्रतिबुद्धः स्वरः बुध्यमानः अप्र
बुद्धईशः एते यथाश्रुति प्रोक्ताः ॥ २१ ॥ नानात्वेति यथोदुंबरेण सह मशकस्य यथा वा जलेन सह मत्स्य
नानात्वैकत्वे एवं चतुर्विंशमानत्वे सह पंचविंशस्येत्यर्थः एतयोः संगतेन नानात्वैकत्वमुक्तं ॥ २३ ॥ अ
व्यक्तज्ञानसंहिते अव्यक्तविषयं पुरुषान्यथा ज्ञानं ज्ञानपूर्वमात्रावशेषमेकत्वमोक्षः स्यान्नाना

425

एषः बृंहणः तत्त्ववान् पारोलवान् कार्यमन्ते महदादि तत्त्वमस्यास्तीति तत्त्ववान्भवयतेः निस्तत्त्वः कार्यका रणवर्जितः शुद्धत्वलक्षणो नत्वं शुद्धब्रह्मास्तीति निशंतिमविवपयं चनि ॥१५॥ एतदेवाह प्राह्विशाउन्ते नत्रु बुद्धिशोऽस्मि लिययाहमपि बुद्धिशोऽस्मि तस्याः नाशकः सहस्रयनरत्नस्याभवाहाविकृ ः नवस्यापानानेक ंनिरूपायि कस्य साक्षात्कारः इति उपस्थेवोपायविघमानत्वादिमाणां वाह केवलेन सत्समर्थेनत

लेनव२

नैव सत्तत्त्ववांस्थानं निस्तत्त्वश्चैव बृंहिमान् ॥ एवमेव ततिन्वींहि दृष्टिमेवं स्थूल
त्वाम् ॥१५॥ बद्रविंशाहमिति मा भोगस्यां मा गोजरामरः ॥ केवलेनैव समता
पाल्यं सशायें ॥१६॥ बाह्यशोन सशुद्धेन त्वरूमानोऽत्र बृंहिमान् ॥ एतज्ज्ञानात्मवि
स्मृतं सोऽत्यान्सञ्जिनितिदृशीनाम् ॥१७॥ चेतनेनसमेनस्यं पञ्चविंशातिकस्पृह ॥ ए
कात्वेवभवत्यस्य यदा बुद्धा न बुध्यते ॥१८॥

इति श्रुतेः प्रहृणांस्समतां याति ॥ यथा कनकरज्जो रज्जोर्नरे शमयत्त्वमपि शाम्यति तथाचरमाब्रह्माका शहितिहेत्यनरेस्वात्मानं वशमयतीत्यर्थः ॥१६॥ एनकेवलमकाशात्मना पञ्चविंशेन बुद्धेनेन ज्ञानेन नश्च बृंहिमान् यतो भवति ततस्माज्ज्ञानमेव नानात्वं ब्रह्मात्मानं सकलक एवमर्थं चरमर्थः ॥१७॥ बहिः शान्भवत्स्वरूपमाह चेतनेनेति पञ्चविंशस्य ब्रह्मण्यपराम्यस्य चेतनात्मकस्य नतु स्पन्दात्मकत्वम वति यदा बुद्धापि ब्रह्मास्मि मानं नबुद्धोऽधानिरोधस्तित्रगाढत्वेन बहिर्दृशानुभवत्यर्थः

६

३८॥ असाधमप्रतिष्ठितं जन्मयेन ततः॥ जन्मानि वा नैकमिमर्थः नाम्लिमरणं येन ततः अमरणं॥ ४१॥ किं

विविक्तशीलाः पुरुषाः प्रियायतिविवादहीनाय च अनाय॥ विज्ञानतश्चैव न चाहितं तमेदमेवं
वशात्मायशमे चहूँयं॥ ३५॥ एतेर्गुणैर्हीनं तमेनं देयमेतत्परं ब्रह्मा विशुद्धमाह॥ न श्रेयसा योजय
तितावृ शोकेन तथैव धर्मं समाधारमपात्रदानात्॥ ३६॥ दृढ्वी मिमांयदापि रत्नपूर्णां दद्याददेयमिति
दमव्रताय॥ जितेन्द्रियायैतदसंशयं ते भवेन्मदेयं परमं नरेंद्र॥ ३७॥ कराल मातेभयमस्ति किंचि
देतत्कृतं ब्रह्म परं त्वयाद्य॥ यथावदुक्तं परमं पवित्रं विशोकमत्यंतमनादिमध्यं॥ ३८॥ अगाध
जन्मामरणं च राजन्निरामयं वीतभयं शिवं च॥ समीक्ष्य मोहं प्रजवाय सर्वं ज्ञानस्य तत्त्वार्थमि
दं विदित्वा॥ ३९॥ अवाप्यमेतद्धि मया सनातनाद्धिरण्यगर्भाद्गदतो नराधिप॥ प्रसादयत्नेन गरी
न्गुरुं चेतं समनातं तेन ब्रह्मयथावदेतदा॥ ४०॥ पृष्टस्त्वया चास्मि यथा नरेंद्र यथा मया प्राप्तं त्वयि चो
क्तमद्य॥ तथा वाप्तं ब्रह्मणो मे नरेंद्र महाज्ञानं मोक्षविदां परायणं॥ ४१॥ भीष्म उवाच॥ एतदुक्तं
परं ब्रह्म यस्मान्नावर्तते पुनः॥ पंचविंशो महाराज परमर्षिनिदर्शनात्॥ ४२॥ पुनरा
वृत्तिमाप्नोति परं ज्ञानमवाप्य च॥ नावबुध्यति तत्त्वेन बुध्यमानो जरामरम्॥ ४३॥ एत
त्रिःश्रेयसकरं ज्ञानं ते परमं मया॥ कथितं तत्त्वतस्तात श्रुत्वा देवर्षितो नृप॥ ४४॥

तदिदं ब्रह्मसूक्तं यस्मान्नावर्तते पुनरिति उपक्रांतमुपपाद्योपसंहरति॥ एतदुक्तमिति॥ ४२॥ ४४॥

सोऽयमेवमनमात् ॥ पंचविंशतिकस्तेति ॥ अप्रमादात्तानातद्धियया म्नहृदा देहमोक्षयितव्यः ॥२५ एवमस्ता
नवाधेसस्येव विमुच्यते नानात्वेत्यर्थः ॥ परोऽन्योऽस्मिन्नदात्मा परस्थमोक्तेत्रणैकीभूय ॥२६॥ परधर्मन्त्येवप

पंचविंशतिकस्यास्य योऽयं देहेषु वर्त्तते ॥ एषमोक्षयितं चेति प्राहुरव्यक्तगोचरान् ॥२५॥ सोऽयमे
वं विमुच्येत नानात्वेनिविनिश्चयः ॥ परश्च परधर्मा च भवत्येष समेत्य वै ॥२६॥ विशुद्धधर्मा शु
द्धेन बुद्धेन च स बुद्धिमान् ॥ विमुक्तधर्मा मुक्तेन समेत्य पुरुषर्षभ ॥२७॥ वियोगधर्मिणा चैव वि
युक्तात्मा भवत्यथ ॥ विमोक्षिणा विमोक्षश्च समेत्येह तथा भवेत् ॥२८॥ शुचिकर्मा शुचिश्चै
व भवत्यमितदीप्तिमान् ॥ विमलात्मा च भवति समेत्य विमलात्मना ॥२९॥ केवलात्मा त
थैव केवलेन समेत्य वै ॥ स्वतन्त्रश्च स्वतन्त्रेण स्वतन्त्रत्वमवाप्नुते ॥३०॥ एतावदेतत्कथितं म
या तेन तथ्यं महाराज यथार्थतत्त्वं ॥ अमत्सरस्त्वं परिगृह्य चार्थं सनातनं ब्रह्म विशुद्धमाद्यम्
३१॥ अवेदनिष्ठस्य जनस्य राजन् प्रदेयमेतन्न परं त्वया भवेत् ॥ विधित्समानाय विबोधका
रणं प्रबोधहेतोः प्रणतस्य शासनं ॥३२॥ न देयमेतच्च तथानृतात्मने शठाय क्लीबाय न
जिह्मबुद्धये ॥ न पण्डितज्ञानपरोपतापिने देयं तदेयं च निबोधयाद्यो ॥३३॥ श्रद्धान्विताय गु
णान्विताय परापवादाद्विरताय नित्यं ॥ विशुद्धयोगाय बुधाय नित्यं क्रियावते च क्षमिणे हि
ताय ॥३४॥

च यतिविशुद्धत्वादिना ॥३१॥ वेदनिष्ठस्येति शठायवन्मर्मश्रद्धाजडस्य अवेदनिष्ठस्येति पा
ठः स्वच्छः विधित्समानाय विशेषेणात्मस्मावेत ॥ धद्गपानेस रूपम ॥३५॥

२३॥ योनिकर्मविशुद्धः पात्रमित्युक्तं तत्र योनिशुद्धं कर्मशुद्धिं व्याचष्टे सत्यतेति ॥ एकस्यैवप

उपसेनमुपासीनः प्रणम्य शिरसा मुनिं ॥ पप्रच्छ तमतस्तेन यत्प्रच्छ वसमाहितं ॥२॥ भगवन्
किमिदं श्रेयः प्रीतिचापीह वा भवेत् ॥ पुरुषस्याध्रुवे देहे कामस्य वशवर्तिनः ॥३॥ सत्कृत्य परिपृष्टः
सन् सिष्टः सन् समहातपाः ॥ निजगाद तत स्तस्मै श्रेयस्करमिदं वचः ॥४॥ ऋषिरुवाच ॥ मनसा
प्रतिकूलानि प्रेत्य चेह च वाञ्छसि ॥ भूतानां प्रतिकूलेभ्यो निवर्तस्व यतेन्द्रियः ॥५॥ धर्मः सतां हि
तः पुंसां धर्मश्चैवाश्रयः सतां ॥ धर्माल्लोकास्त्रयस्तात प्रवृत्ताः सचराचराः ॥६॥ स्वाद्वकामुक का
मानां वेत्तस्यं किं न गच्छसि ॥ मधु पश्यसि दुर्बुद्धे प्रपातं नानुपश्यसि ॥७॥ यथा ज्ञाने परिचयः क
र्तव्यस्तत्फलार्थिना ॥ तथा धर्मे परिचयः कर्तव्यस्तत्फलार्थिना ॥८॥ असता धर्मकामेन विशु
द्धं कर्म दुष्करं ॥ सता तु धर्मकामेन सुकरं कर्म दुष्करं ॥९॥ वने ग्राम्यसुखाचारो यथा ग्रा
म्यस्तथैव सः ॥ ग्रामे वनसुखाचारो यथा वनचरस्तथा ॥१०॥ मनोवाक्कायिके धर्मे कुरुष्व
श्रद्धां समाहितः ॥ निवृत्तौ वा प्रवृत्तौ वा सम्प्रधार्य गुणागुणान् ॥११॥ नित्यं च बहु दातव्यं साधु
ष्वनसूयता ॥ प्रार्थितं व्रतशौचाभ्यां सत्कृतं देशकालयोः ॥१२॥ शुभेन विधिना लब्ध
मर्हाय प्रतिपादयेत् ॥ क्रोधमुत्सृज्य दत्वा च नानुतप्येन्न कीर्तयेत् ॥१३॥ अनृशंसः शुचि
र्दान्तः सत्यवागार्जवे स्थितः ॥ योनिकर्मविशुद्धश्च पात्रं स्याद्वेदविद्द्विजः ॥१४॥ ॥

त्रीनन्तस्यन्यपूर्वां जाताः पुत्रोत्पत्तेः योनिः स्थानम् ॥१५॥ ॥ रामः ॥

४३१

427

४६ विनेविज्ञाने ॥४७॥ उपाद्रवत् ॥ क्लेशावानभूतं प्रकृतेच ॥ मैमेतत्भयात्तथि ॥५१॥३॥ इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोः श्रीनीलकंठस्य कृतौ भारतभावदीपे शांतिपर्वणि मोक्षधर्मे भूवसिष्ठकरालजनकसंवादोदाशोऽध्यायः ॥

हिरण्यगर्भाद्द्युतिमान्वसिष्ठेन महात्मना ॥ वसिष्ठादृषिशार्दूलान्नारदोवाप्तवानिदं ॥५५॥ नारदाद्विदितं मह्यमेतद्ब्रह्म सनातनं ॥ मा शुचः कौरवेंद्र त्वं श्रुत्वैतत्परमं पदं ॥५६॥ येन क्षराक्षरे व्यक्ते भयं तस्य न विद्यते ॥ विद्यते तु भयं यस्य यो नैनं वेत्ति पार्थिव ॥५७॥ अविज्ञानाच्च मूढात्मा पुनः पुनरुपाद्रवत् ॥ प्रेत्य जातिसहस्राणि मरणांतान्युपाश्नुते ॥५८॥ देवलोकं तथा तिर्यङ्मानुष्यमपि चाश्नुते ॥ यदि शुध्यति कालेन तस्मादज्ञानसागरात् ॥५९॥ अज्ञानसागरो घोरो ह्यव्यक्तोगाध उच्यते ॥ अहन्यहनि मज्जंति यत्र भूतानि भारत ॥६०॥ यस्मादगाधादव्यक्तादुत्तीर्णस्त्वं सनातनात् ॥ तस्मात्त्वं विरजाश्चैव वितमस्कश्च पार्थिव ॥६१॥ ॥ मोक्षधर्मे वसिष्ठकरालजनकसंवादे ॥ भीष्म उवाच ॥ मृगयां विचरन्कश्चिद्विजने जनकात्मजः ॥ वने ददर्श विप्रेंद्रमृषिं वंशधरं भृगोः ॥१॥

किं नरस्तरतीति दृष्टमात्रस्य स्वयाख्यानाय चतुर्विंशाध्यायानंतरं मृतकापंचविंशोत्तरशततियोग मननमुक्तो सोपि धर्मो यमिमं नैत्यातरण्ठेतिधर्मापमसः ॥ पदि वशोत्तरः सोस्य मतेनोपदिमः तेष्यांचिद्यामस्तलदयुगामेषिकार्देतन्का श्चिद्धर्मोत्तिपतेमृगयां विचरन्निस्यध्यायेन ॥१॥

यथा कठवल्लीषु येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके इत्यादिना प्रश्नप्रति-
वचनेन स्थूलदेहनाशेप्यात्मास्तित्वं प्रसाधितं तेन सैव पुनरन्यत्र धर्मादन्यत्राधर्मात् अन्यत्रास्मात् कृताकृतात् अ-
न्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेत्यादिना धर्माद्युपहितलिंगशरीरादन्यत्वं प्रश्नपूर्वकं सा-
धितं तदिहापि साधयति धर्माधर्मे विमुक्तमित्यादिना धर्माधर्मौ सुखदुःखे तद्धेतू संशय

युधिष्ठिर उवाच॥ धर्माधर्मविमुक्तं यद्विमुक्तं सर्वसंशयात्॥ जन्ममृत्युविमुक्तं च विमुक्तं
पुण्यपापयोः॥१॥ यच्छिवं नित्यमभयं नित्यमक्षरमव्ययं॥ शुचि नित्यमनायासं तद्भवान्वक्तु-
मर्हति॥२॥ भीष्म उवाच॥ अत्र ते वर्तयिष्यामि इतिहासं पुरातनं॥ याज्ञवल्क्यस्य संवादं ज-
नकस्य च भारत॥३॥ याज्ञवल्क्यमृषिश्रेष्ठं देवरातिर्महायशाः॥ पप्रच्छ जनको राजा
प्रश्नं प्रश्नविदां वरः॥४॥

ग्राह्यितं मवस्तु विषयं श्रोत्रादिज्ञानं रागादिजनकं तैर्विमुक्तं पुण्यपापयोर्मा स्मावस्तु॥१॥ शिवं शिवज्ञान-
दायपेक्षितयानुरोधं शिवमद्वैतं चतुर्थं मन्यंत इति श्रुतेः नित्यमभयं सर्वदाभयशून्यं प्रलयादौ
कारणब्रह्मभावप्राप्तस्यापि जन्मांतरसत्वात्॥२॥ नित्यमव्ययं विनाशि हिरण्यगर्भादिवन्नरपती-
स्पर्शः अक्षरं अपचयशून्यं अतएवाव्ययं नाशहीनं शुचि स्वतो निर्दोषं नित्यमनायासं दुःखापि-
रूपकं प्रकृतकोऽस्य भावं॥३॥ यास्ये यज्ञाष्टमपि ष्टमप्रपसर्थं त्वादावश्यकं जनस्तवं प्रारभ्या

१०॥ विरक्तस्येति विरेचनानन्तरमेव यथा उक्तं पानं भेषजं एवं दानेन निर्हृतदोषस्यैव यागादि

सत्कृता चैव पत्नी च जातस्यायोनिर्दिश्यते ॥ अरुग्णत्सामयो विद्वान् षट्कर्मा पात्रमुच्य
ते ॥१५॥ सएष धर्मः सोऽधर्मस्तं तत्प्रतिनरं भवेत् ॥ पात्रकर्मविशेषेण देशकालावपेक्ष्य च ॥
१६॥ लीलयाल्पं यथा गात्रात् प्रमज्यात् रजः पुमान् ॥ वहूयत्नेन च महता पापनिर्हरणं यथा ॥
१७॥ विरक्तस्य यथा सम्यग् ज्ञातिभेव तिभेषजं ॥ तथा निर्हृतदोषस्य प्रेत्य धर्मः सुखावहः ॥
१८॥ मानसं सर्वभूतेषु वर्तते वै शुभाशुभं ॥ अशुभेभ्यः सदाक्षिप्य शुभेष्वेवावतारयेत् ॥
१९॥ सर्वं सर्वेण सर्वत्र क्रियमाणं च पूजयेत् ॥ स्वधर्मे यत्र रागस्ते कामं धर्मो विधीयतां ॥२०॥
अधृतात्मन नैतिष्ठे वुद्धिमान् भव ॥ अप्रशान्तः प्रशाम्यत्वमप्रज्ञां प्राज्ञवच्चर ॥२१॥ तेजसा शक्यते प्राप्तुमुपायाः सहचारिणां ॥ इह च प्रेत्य च श्रेयस्तस्य मूलं धृतिः परा ॥२२॥ राजर्षिधृतिस्वर्गान्पतितो ह्रिमहाभिषः ॥ ययातिः क्षीणपुण्योऽपि धृत्या लोकानवाप्तवान् ॥
२३॥ तपस्विनां धर्मवतां विदुषां चोपसेवनात् ॥ प्राप्स्यसे विपुलां वुद्धिं तथा श्रेयोऽभिपत्स्यसे ॥
२४॥ भीष्म उवाच ॥ सतत्स्वभावसंपन्नस्तच्छ्रुत्वा मुनिभाषितं ॥ विनिवर्त्य मनः कामाद्धर्मे वुद्धिं
चकार ह ॥२५॥ शान्तिमोदधर्मेषु जनकानुशासनेनाम अध्यायः ॥२८॥

धर्मः सुखावहः स्पष्टः ॥२५॥ इति श्रीशान्तिमोदधर्मे पात्रोपरिचर्याविंशोऽध्यायः ॥२८॥

एवमाद्याः श्रोत्राद्याः शब्दादीनां भौतिकत्वोपपादकत्वात्कावाक्यशेषविरोधात् यथाश्रुतमेव साधु सर्वं
मलत्वमात्रेयांचमर्वशास्त्रविप्लवः स्यात् एते शब्दादयः दश विशेषाः विकारांतरानुपादानत्वं वि
शेषत्वं तत्र शब्दादिष्वेव दृष्टं न स्थूलपृथिव्यादिषु समस्तविकारांतरोत्तमपि न विशेषः तस्य ब्रह्म
माणरीत्या महाभूतोपादानत्वात् श्रोत्रादीनामपि विशेषत्वं निरवशेषबुद्धीन्द्रियसविशेषाणीमनेन
श्रोत्रादयो न विशेषा इत्युक्तं ॥१४॥ षोडशमिति बुद्ध्यहंकाराभ्यां मनः षट्करोति एतज्ज्ञानं भववला

एते विशेषा राजेन्द्र महाभूतेषु पंचसु ॥ बुद्धीन्द्रियाण्यथैतानि सविशेषाणि मैथिल ॥१४॥
मनः षोडशकं प्राहुरध्यात्मगतिचिंतकाः ॥ त्वं चैवान्ये च विद्वांसस्तत्वबुद्धिविशारदाः ॥
॥१५॥ अव्यक्ताच्च महानात्मा समुत्पद्यत पार्थिव ॥ प्रथमं सर्गमित्येतदाहुः प्राधानिकं बुधाः
॥१६॥ महतश्चाप्यहंकार उत्पद्यति नराधिप ॥ द्वितीयं सर्गमित्याहुरेतद्बुद्ध्यात्मकं स्मृतं ॥१७

तत्वचिंतार्थिकादीनां बुद्धेर्मतमस्माकं त्वं चेति ॥ तथाहि लौकिकाः अहंकारमात्मानं बुद्धिं तद्गुणं मनो नाम
रिंद्रियं चेति मन्यते पादयं शास्त्रनत्वेन तु मनो बुद्धिरहंकारश्चांतःकरणमांतरं ॥ तेषां योनिश्चयो गर्वः स्मर
णं विषया अमी इति सर्वेषां मतं रिंद्रियत्वमेव ॥१५॥ सृष्टिक्रममाह अव्यक्तादिति स्वपुत्रात् व्यक्तमोऽज्ञानं
यद्बीजं स्वप्नबोधयोरव्यक्तेऽव्यक्तमिह सौषुप्तं तमः तस्मात् महानात्मा अयमहं ब्रह्मास्मीत्यनुभ
व इति विशेषानालिंगितोऽस्मीति यो विषयोऽहंकारः ॥१६॥

अव्यक्तं कारणं ब्रह्म परं महदादेः तस्माच्च परतो निर्गुणं ॥ ४ ॥ कांक्षिणः कांक्षिणो महत्सिद्धिलिप्सवः ॥ ५ ॥ सांख्ययोगयोरेकार्थ्यं समागतत्वाद् उभयसंमतमिममर्थं अव्यक्तं योगमते जडं सांख्ये च सांख्य

जनक उवाच ॥ कं तौ द्वियाणि विप्रर्षे कति मक्तिर्यास्मृताः ॥ किमव्यक्तं परं ब्रह्म तस्माच्च परतः तु किं ॥ ४ ॥ प्रभवं चाप्ययं चैव कालसंख्यां तथैव च ॥ वक्तुमर्हसि विप्रेन्द्र त्वदनुग्रहकांक्षिणः ॥ ५ ॥ अज्ञानात्परिपृच्छामि त्वं महाज्ञानमयो निधिः ॥ तदहं श्रोतुमिच्छामि सर्वमेतदसंशयम् ॥ ६ ॥ याज्ञवल्क्य उवाच ॥ श्रूयतामवनीपाल यदेतदनुपृच्छसि ॥ योगानां परमं ज्ञानं सांख्यानां च विशेषतः ॥ ७ ॥ न तवाविदितं किंचित् मां तु जिज्ञाससे भवान् ॥ पृष्टेन चापि वक्तव्यमेष धर्मः सनातनः ॥ ८ ॥ अष्टौ प्रकृतयः प्रोक्ता विकाराश्चापि षोडश ॥ तत्र तु प्रकृतीरष्टौ प्राहुरध्यात्मचिन्तकाः ॥ ९ ॥ अव्यक्तं च महांश्चैव तथाहंकार एव च ॥ पृथिवी वायुराकाशमापो ज्योतिश्च पंचमं ॥ १० ॥ एताः प्रकृतयस्त्वष्टौ विकारानपि मे शृणु ॥ श्रोत्रं त्वक् चैव चक्षुश्च जिह्वा घ्राणं च पंचमं ॥ ११ ॥ शब्दः स्पर्शश्च रूपं च रसो गंधस्तथैव च ॥ वाक् च हस्तौ च पादौ च पायुर्मेढ्रं तथैव च ॥

मते चिन्मात्रमिति विवेकाग्रभूमी स्वरूपमव्यक्तं शुद्धं ब्रह्म ज्ञानेन बाध्यत इति यद्यप्येषामवान्तरधर्मभेदोस्ति तथाप्यव्यक्तादिधर्मिणः सर्वेषामप्यमानत्वेया इति भावः ॥ ९ ॥ पृथिव्यादिपदैस्तन्मात्राण्युच्यन्ते महत्तिशब्दितत्वात् ॥ १० ॥ शब्दादयः स्थूलविषयाः ॥ ११ ॥

ऊर्ध्वस्रोतः प्रवाहोऽस्येति प्राणः ऊर्ध्वस्रोताः तिर्यक् तिर्यगपि स्रोतः पदानुषंगो द्रष्टव्यः तेन नाभि
मध्यस्थस्य समानस्य सर्वांगव्यापिनः ॥ व्यानस्य सर्वसंधिगतस्य उदानस्य उपरिभागगतस्य प्राणो
ग्रहणं ॥ एतदार्जववकं एतस्यैवेंद्रियवर्गस्य आर्जववक्रजन्मवृत्तिः विशेषानाज्ञात्वा सामान्यवृत्तिरि
ति यावत् तथ चोक्तं सांख्ये स्वस्यासामान्या करणवृत्तिः प्राणाद्या वायवः पंचेति ॥ २३ ॥ तिर्यक् स्रोताः

ऊर्ध्वस्रोतस्तथा तिर्यग्उत्पद्यति नराधिप ॥ अष्टमं सर्गमित्याहुरेतदार्जवकं स्मृतं ॥ २३ ॥ ति
र्यक् स्रोतस्त्वधःस्रोत उत्पद्यति नराधिप ॥ नवमं सर्गमित्याहुरेवदार्जवकं बुधाः ॥ २४ ॥ एता
नि नव सर्गाणि तत्त्वानि च नराधिप ॥ चतुर्विंशतिरुक्तानि यथाश्रुतिनिदर्शनात् ॥ २५
अत ऊर्ध्वं महाराज गुणस्यैतत् स्वतन्ततः ॥ महात्मभिरनुप्रोक्तां कालसंख्यां निबोध मे ॥ २६
शांतौ मोक्षधर्मेषु याज्ञवल्क्यजनकसंवादे ॥ ॥ ॥

शब्देन तेषामेव समानोदानव्यानानां देहस्याधोभागगतो ग्राह्यः ग्रहणं अधःस्रोतः अपानः शेषं
प्राग्वत् ॥ २४ ॥ सर्गाणि क्लीबत्वमार्षं वचनं विशेषणं ॥ अव्यक्तमहदहंकारमनांसि चत्वारि पंचभूता
नि पंच शब्दाद्याः पंच ज्ञानेंद्रियाणि पंच कर्मेंद्रियाणि प्राणादि पंचकं सेंद्रियेष्वेवांतर्भावाच्चतुर्विं
शतिरेवमर्थ ॥ २५ ॥ गुणस्य सगुणस्य सर्गस्य तत्त्वतः ततः उपासनपानंतरज्ञानमाप्यवधौ पंचमी ॥ यावतः
यावंतं कालं तिष्ठति तं कालस्य संख्यां निबोध बुद्ध्यस्व मे मतः ॥ २६ ॥ शांतौ परिपंचत्रिंशः ॥ ३५

430

ततः संकल्पविकल्पात्मकं मनः तच्च भूतगुणात्मकं विपरीक्षितं तत्तद्गुणग्रहणात्मकं ॥१७॥ अत एव
तस्मान्मनसो भूतात्मत्वमित्युच्यते। ततो मानसत्वात् भूतानां स्थूलसूक्ष्मतारूपो विभागो नास्तीति शेषेषु
शब्दादय एव गुणानां स्थूलसूक्ष्मावस्थायाः तेषां शब्दादिहेतुत्वेन विकारान्तरानुपादानत्वरूपविशेष
त्वायोगात् एतच्च तार्किकादीनामपि अभिमतमेव तत्र सष्टीतं वचनं ग्राहिता किं काः गुणानः सकाशाद्
गुणत्वमिति मिलित आकाशादिभ्य एव शब्दाद्युत्पत्तिरिति सूत्रकारेभ्यः परास्था अर्थभ्यश्च परंम

अहंकाराच्च संभूतं मनो भूतगुणात्मकं ॥ तृतीयः सर्ग इत्येष अहंकारिक उच्यते ॥१८॥ मनः
स्तस्य समुद्भूता महाभूता नराधिप ॥ चतुर्थं सर्गमित्येतं मानसं विद्धि मे मते ॥१९॥ शब्दः स्प
र्शश्च रूपं च रसो गंधस्तथैव च ॥ पंचमं सर्गमित्याहुः भौतिकं भूतचिंतकाः ॥२०॥ श्रोत्रं त्वक्चै
व चक्षुश्च जिह्वा घ्राणं च पंचमं ॥ सर्गं षष्ठमित्याहुर्बहुचिंतात्मकं स्मृतम् ॥२१॥ अ
धः श्रोतेन्द्रियग्रामः सप्तमस्य घोते नराधिप ॥ सप्तमं सर्गमित्याहुरेतदैन्द्रियकं स्मृतम् ॥२२

तः ॥ मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्
सा काष्ठा सा परा गतिरिति विलोमक्रमेण इममेवानुक्रमं प्रदर्शयति परत्वं कारणत्वं अर्थाः
स्तादयः ॥१९ शब्दादीनां सर्गस्तु भौतिकः पंचमः ॥२०॥ बहुचिंतात्मकं मानसमित्यर्थः एतेन शब्दादी
नां श्रोत्राद्युत्पादकत्वमुक्तं तेन च तेषां विशेषत्वं इंद्रियकं ते भवति ॥२१॥ श्रोत्रादिभ्यो अधस्तात् अधः स्रो
तः स चासौ इंद्रियग्रामश्च वागादिः सोपि श्रोत्रादिवच्चिंतात्मक एवेति भावः ऐन्द्रियकं इंद्रियसम्

१॥ सृजतो निजं सृष्टिं महान्तं भूतं महाभूतोपादानत्वात् देहाद्भौतिकदेहोत्पत्तेः एवं चतुरः भौतिका
न्सृष्टिमनोबुद्ध्यहंकारचित्ताख्यान् पुत्रान्महाद्रुषिरसृजत् ॥ ७ ॥ ते चत्वारः पुत्राः पितॄणां महाभू
तानामपि पितरः इति मनआदयः एव भूतानां कल्पकाः इत्यर्थः ॥ एवं दृष्टिसृष्टिमुक्ताः सृष्टिसृष्टिम

एतस्यापि च संख्याने वेदवेदांगपारगाः ॥ दशकल्पसहस्राणि पादोनान्यहरुच्यते ॥ ६ ॥ रा
त्रिमेतावतीं चास्य प्राहुर्ध्यानस्य चिन्तकाः ॥ सृजत्यहंकारमृषिर्भूतं दिव्यात्मकं तथा ॥ ७
चतुरश्चापरान्पुत्रान्देहात्सर्वे महानृषिः ॥ ते वै पितॄणां पितरः श्रूयन्ते राजसत्तम ॥ ८ ॥ दे
वाः पितॄणां च सुता देवैर्लोकाः समावृताः ॥ चराचरा नरश्रेष्ठ इत्येवमनुशुश्रुम ॥ ९ ॥ पर
मेष्ठी त्वहंकारात्सृजन्भूतानि पंचधा ॥ पृथिवी वायुराकाशमापो ज्योतिश्च पंचमं ॥ १०
एतस्यापि निशामाहुस्तृतीयमिह कुर्वतः ॥ पंचकल्पसहस्राणि तावदेवाहरुच्यते ॥ ११ ॥ श
ब्दः स्पर्शश्च रूपं च रसो गंधस्तथैव च ॥ एते विशेषा राजेन्द्र महाभूतेषु पंचसु ॥ १२ ॥ यैराविष्ट
ानि भूतानि अहन्यहनि पार्थिव ॥ अन्योन्यं स्पृहयन्त्येते अन्योन्यस्य हिते रताः ॥ १३ ॥

इह देवाः इन्द्रियाणि अन्तःकरणचतुष्टयसहिताः पितॄणां महाभूतानां सुता देवैर्भूतैः लोकाः स्वतन्दे
हाभुवनानि चराचराः स्वतन्देतरौ ते भूतैरेवावृताः ॥ ८ ॥ एतदेव विस्पष्टयति परमेष्ठीति चकारात्
भौतिकानि मनआदीनि ॥ ९ ॥ अहंकारोपासकस्यापि कालमानमाह एतस्येति तृतीयं अहंकारिकसर्गं

432

श्री

३३५

मोक्षस्यानेनैव तत्वं कर्मोपास्तिफलस्य सर्वस्य सावधिकत्वमाह॥ अव्यक्तस्येत्यादिना अव्यक्तस्योपास
नयाऽव्यक्तभावंगतस्य रात्रिरेतावतीति अनयैव संख्यया शतायुर्वै पुरुष इति श्रुतेरस्य शतं वर्षा
ण्यायुरिति ज्ञेयं एवमन्तरन्तरुत्सेस्सृष्टिमाह सृजतीति॥ औषधिमग्र इत्यत्र कार्यं मनः अन्नमयं हि सौम्य
मन इति श्रुतेः॥ असतोऽपि मनोऽसृज्यत आसंचक्षे इत्यादिनाऽव्यक्तान्महत्तत्वान्तरं तामसत्वमनोऽसृज
दित्यर्थः मनः प्रजापतिमसृजदिति श्रुतेरर्थमाह॥ तत इति मनोहाराऽव्यक्तमेव प्रजापतिमं

याज्ञवल्क्य उवाच॥ अव्यक्तस्य नरश्रेष्ठ कालसंख्यां निबोध मे॥ पंचकल्पसहस्राणि द्विगु
णान्यहरुच्यते॥१॥ रात्रिरेतावती चास्य प्रतिबुद्धो नराधिप॥ सृजत्योषधिमेवाग्रे जीवनं सर्वदेहि
नां॥२॥ ततो ब्रह्माणमसृजद्धिरण्याण्डसमुद्भवं॥ सा मूर्तिः सर्वभूतानामित्येवमनुशुश्रुम
॥३॥ संवत्सरमुषित्वांडे निष्क्रम्य च महामुनिः॥ संदधेऽर्धमहीं कृत्स्नां दिव्यमर्धं प्रजापतिः
॥४॥ द्यावापृथिव्योरित्येष राजन्वेदेषु पठ्यते॥ तयोः शकलयोर्मध्यमाकाशमकरोत्प्रभुः॥

सृजदिति श्रुत्यर्थोऽत्र विधिः एवमन्यास्वपि श्रुतिषु आकाशादीनां वाय्वादिस्रष्टृत्वोक्तिर्व्याख्येया
अंडे ब्रह्मांडे वा सन्नोमयं सोऽतितष्ठेदितोऽभ्युच्यते॥ महामुनिः महान् संदधे अनुसंधानेन हृतः
ज्ञानः अव्यक्तस्याव्याकृतस्य ये यत्नदो हि ति वक्ष्यमाण प्रजापतेर्यत्नि मानि कर्मानुरोधेन सृष्ट्यमरस्यांश
लोचनात्मकस्पंदनलक्षणस्य कार्यों विविदिषितात्मकाधारमेस्मरीशानिः सैवमहत्तत्वमहत्तत्वमाह

म॰भा॰
मो॰
४३६
४३७

३ स्वयंभूर्विष्णुरेव शतसहस्रं सोमो भवति ॥ ४ ॥ जानन्नल्पतिश्रुतिपायेन हलति ॥ ५ ॥ अष्टात्मकः ययाद्यादश
न्मासद्र्येः एवमष्टात्मको वायुः सर्वैः स्वरूपैर्गुणपद्मातीत्यर्थः ॥ ११ ॥ अहंकारः अहंकारं महानात्माग्रस

अहः त्वयमथो बुध्वानिरायवसमनाल्पया ॥ चोदयामास भगवानव्यक्तो हंसनेनरे ॥ ३ ॥ त
तः शतसहस्रांशुरव्यक्तेनाभिचोदितः ॥ कृत्वा द्वादशधात्मानमादित्यो ज्वलदग्निवत् ॥ ४ ॥
चतुर्विधं महीपाल निर्दहत्याशु तेजसा ॥ जरायुजाण्डजस्वेदजोद्भिज्जं च नराधिप ॥ ५ ॥ एत
दुन्मेषमात्रेणाविनष्टं स्थाणुजंगमं ॥ कूर्मपृष्ठसमा भूमिर्भवत्यथ समंततः ॥ ६ ॥ जगद्द
ग्ध्वामितबलः केवलां जगतीं ततः ॥ अंभसा बलिना क्षिप्रमापूरयति सर्वशः ॥ ७ ॥ ततः का
लाग्निमासाद्य तदंभो याति संक्षयं ॥ विनष्टेंभसि राजेंद्र जाज्वलत्यनलो महान् ॥ ८ ॥ तमप्र
मेयोतिबलं ज्वलमानं विभावसुं ॥ ऊष्माणं सर्वभूतानां सप्तार्चिषमथांजसा ॥ ९ ॥ भक्ष
यामास भगवान्वायुरष्टात्मको बली ॥ विचरन्नमितप्राणस्तिर्यगूर्ध्वमधस्तथा ॥ १० ॥ तम
प्रतिबलं भीममाकाशं ग्रसतेत्मना ॥ आकाशमप्यतिनदन्मनो ग्रसति चाधिकं ॥ ११ ॥ मनो
ग्रसति भूतात्मा सोहंकारः प्रजापतिः ॥ अहंकारो महानात्मा भूतभव्यभविष्यवित् ॥ १२ ॥
तमप्यनुपमात्मानं विश्वं शंभुः प्रजापतिः ॥ अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः ॥
सर्वतः पाणिपादांतः सर्वतोक्षिशिरोमुखः ॥ सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १४ ॥

लीयत इत्यनुषज्यते ॥ १३ ॥ शंभुः ईश्वरः तमेव विशिनष्टि अणिमेति सर्वसिद्धिरूप इत्यर्थः ॥ १४ ॥ सर्वत इत्यादिनाश्चर्यं ते

४३६
४३७

हारिभिर्हरणां शीलैः गुणैः रूपादिभिः ॥ २४ ॥ गीतीति ॥ एतेषां विशेषोपासकानां ॥ २४ ॥ भक्तादीनां
मुपास्तिमेन आख्यान्महतउपासनाग्रांतरिच्यतउपायेनमनतः मायात्मप्रतिपादयतिम

अन्योऽन्यमतिवर्तन्ते अन्योन्यस्य हि निलया ॥ नेवधमानासन्योन्यं गुणौर्हारिभिरव्ययैः
इह वे परिवर्तन्ते तिर्यग्योनिसवेशिनः ॥ २५ ॥ गोणिकल्पसहस्राणि एतेषां महत्स्वन्तः
रात्रिरेतावतीचैवमनसश्चनराधिप ॥ २५ ॥ मनस्त्वरति रोजेद्रचारिते सर्वमिंद्रियैः ॥ नचें
द्रियाणि पश्यंति मन एवानुपश्यति ॥ २६ ॥ चक्षुः पश्यति रूपाणि मनसा तु न चक्षुषा
मनसि व्याकुले चक्षुः पश्यन्नपि न पश्यति ॥ २७ ॥ तथेंद्रियेषु सर्वं मनस्य परं भवेत् ॥ ए
वं मनः प्रधानानि इंद्रियाणि प्रभावयेत् ॥ इंद्रियाणां तु सर्वेषामीश्वरं मनुउच्यते ॥
एतद्विशन्ति भूतानि सर्वाणीह महायशाः ॥ यांतो मेलुधमेवुजनकपानवल्कासेवा
देः ॥ याज्ञवल्क्यउवाच ॥ तत्वानां सर्गसंख्या च कालसंख्यां तथैव च ॥ मया प्रोक्तानुपू
र्वेण संहारमपि मे शृणु ॥ १ ॥ यथा संहरते जंतून् सृजते च पुनः पुनः ॥ अनादिनिधनो
ब्रह्मा नित्यश्चाक्षर एव च ॥ २ ॥

तस्मरनीत्यादिना ॥ २१ ॥ अध्यायः ॥ विनाशिफलत्वेपि भोजनादिवत्तत्वानामुपास्तिरादृतेत्येमा
शंकानत्फलस्यानैवीभन्सतां दर्शयितुं प्रलयमाह तत्वानामित्यादिना ग्रंहहृतेनरेश्वहकारा

याज्ञवल्क्यउवाच॥ पादावध्यात्ममित्याहुर्ब्राह्मणास्तत्वदर्शिनः॥ गंतव्यमधिभूतंच विष्णुस्तत्रा
धिदैवतं॥१॥ पायुरध्यात्ममित्याहुर्यथातत्वार्थदर्शिनः॥ विसर्गमधिभूतंच मित्रस्तत्राधिदै
वतं॥२॥ उपस्थोध्यात्ममित्याहुर्यथायोगप्रदर्शिनः॥ अधिभूतंतथानंदो दैवतंच प्रजाप॰
तिः॥३॥ हस्तावध्यात्ममित्याहुर्यथासंख्यानदर्शिनः॥ कर्तव्यमधिभूतंतु इंद्रस्तत्राधिदैवतं
॥४॥ वागध्यात्ममितिप्राहुर्यथाश्रुतिनिदर्शिनः॥ वक्तव्यमधिभूतंतु वह्निस्तत्राधिदैवतम्
॥५॥ चक्षुरध्यात्ममित्याहुर्यथाश्रुतिनिदर्शिनः॥ रूपमत्राधिभूतंतु सूर्यश्चाप्यधिदैवतं॥६॥
श्रोत्रमध्यात्ममित्याहुर्यथाश्रुतिनिदर्शिनः॥ शब्दस्तत्राधिभूतंतु दिशस्तत्राधिदैवतं
॥७॥ जिह्वामध्यात्ममित्याहुर्यथाश्रुतिनिदर्शिनः॥ रसएवाधिभूतंतु आपस्तत्राधिदैवतं
॥८॥ घ्राणमध्यात्ममित्याहुर्यथाश्रुतिनिदर्शिनः॥ गंधएवाधिभूतंतु पृथिवीचाधिदैवतं
॥९॥ त्वगध्यात्ममितिप्राहुस्तत्वबुद्धिविशारदाः॥ स्पर्शमेवाधिभूतंतु पवनश्चाधिदैव॰
तं॥१०॥ मनोध्यात्ममितिप्राहुर्यथाशास्त्रविशारदाः॥ मंतव्यमधिभूतंतु चंद्रमाश्चाधि
दैवतं॥११॥ अहंकारिकमध्यात्ममाहुस्तत्वनिदर्शिनः॥ अभिमानोधिभूतंतु बुद्धिश्चा॰
त्राधिदैवतं॥१२॥ बुद्धिरध्यात्ममित्याहुर्यथावदभिदर्शिनः॥ बोद्धव्यमधिभूतंतु क्षेत्रज्ञ
श्चाधिदैवतम्॥१३॥

433

हृदये हृदयस्थायां बुद्धे भवतेकः पर्वणा एकदेशेन अग्रहमात्रकः बुद्धुपाधिवशात् अग्रहस्परमात्
मसर्थः अग्रहमात्रः पुरुषान्तरात्मेत्यादिश्रुतेः विश्वमहत्त्वं ॥५५॥ महात्मनोऽपि नाशे सर्वं उस्य सम
भवतु अपि भवति । तेषामप्युच्चयः अयोन्नाशः अणः परिणामसैलः रहितं अनवमायादोषाः सर्विने
ध्यः ॥ इमवमलयं योगिनो निमममत्त भवतो महर्हरन्तु छेयइत्याशायेनाहाध्यात्मकिति अयंभावः
अस्यान्तो विभूतयो सपुहूयस्वाचारश्लेषेः पृथिवीवाग्निश्रुत्यादिषु स्थाः ध्यात्मिकवाचः सकाशाद
विभौतिकानां पृथिव्यादीनामाधिदैविकानां आत्मादीनां च उत्पत्तिः श्रुतः तत्वाचो निग्रहेण तन्त्वा

हृदयं सर्वभूतानां पर्वणो ग्रहमात्रकः ॥ अथ यस्तन्यते तो हि महात्मा विश्वमीश्वरः ॥५५॥ त
तः समभवत्सर्वमत्तया अवमत्रणं ॥ भूतभव्यभविष्याणां महाशरमनवेन या ॥ ६ ॥ पुषो प
येश्वरात्मेंद्रयथाव तस्मदाहृतः अधात्ममधिभूतं च अधिदैवं च ज्ञायतां ॥ २ ॥ यातो मो

(एतेषु मे दृष्यातं तवस्मानेन संवादे ॥ ॥

ध्येयोः पृथिव्यग्नोरपि ... मलयो भवतीति सर्वकारणल
यात्सर्वलयेसतिकेवलाभ्रैतोवशिष्यतेननवागादेलयेपिअवहाराञ्च्छेदादन्यादिः
लयोनयुज्यतेइतिचेत् अथोनाशियेः आदौमध्येंतिनतेषांवागादयालीनाः सर्तिं । यस्य
नेवागादयोलीनाः नासौवह्यादीनामव्यपतीति । तेनेवमपच्यमस्यरतस्तत्स्यतासात् योगिदृष्या
नाशोपितस्यस्यात्दभावाद्विति चेतद्द्याणतिः नाहिनित्यस्यनिहितवस्तुवहूनामलाय ह शोम
ध्येक्षित्रप्यप्रणीतरेतस्यत्तात् निपुञ्यते ॥ तस्माद्ज्वरगसमस्यासंसारस्योच्छेदापतञ्ज्ज्ञा
नार्थंपतञ्जस्यपरंतं ॥ २ ॥ शान्तोपरिसमाप्तिप्रोधाय ॥ १२ ॥ ॥

२८॥ मानोपर्यं हर्षस्त्रिशः एते गुणा विकारे स्तन्त्रकारकाः प्रहर्षोनेकधा विक्रियते त्रप्रकाशश्चाग्र
स्यापुण्यादिमिराकाशश्चैवकाहलकलशानलिकागुणाचिर्मिश्चैवचतेलंदंशयाकारतामिव

परापवादेष्वरतिर्विवादानां च सेवने ॥ अहंकारमसत्कारः स्थितानां वैरोपसेवने ॥ २२ परि
तापोऽभिहरणं ह्रीनाशोऽनार्जवं तथा ॥ भेदः परुषता चैव कामः क्रोधो मदस्तथा ॥ २३ दर्पो
द्वेषोऽतिवादश्च एते प्रोक्ता राजसा गुणाः ॥ तामसानां तु संघातं प्रवक्ष्याम्युपधार्यताम् ॥ २४
मोहोऽप्रकाशस्तामिस्रमन्धतामिस्रसंज्ञितम् ॥ मरणं चान्धतामिस्रं तामिस्रं क्रोध उच्यते ॥
२५ ॥ तमसो लक्षणानीह भक्षाणां चाभिरोचनम् ॥ भोजनानामपर्याप्तिस्तथा पेयेष्वतृप्य
ता ॥ २६ ॥ गन्धवासोविहारेषु शयनेष्वासनेषु च ॥ दिवास्वप्नेऽतिवादे च प्रमादेषु च वै रतिः ॥
२७ ॥ नृत्यवादित्रगीतानामज्ञानाच्छ्रद्दधानता ॥ द्वेषो धर्मविशेषाणामेते वै तामसा गुणाः ॥
२८ ॥ शान्तितो मोक्षधर्मेषु याज्ञवल्क्यजनकसंवादे ॥ याज्ञवल्क्य उवाच ॥ एते प्रधानस्य गुणास्त्र
यः पुरुषसत्तम ॥ कृत्स्नस्य चैव जगतस्तिष्ठन्त्यनपगाः सदा ॥ १ ॥ अव्यक्तरूपो भगवान् शतश
धा च सहस्रधा ॥ शतधा सहस्रधा चैव तथा शतसहस्रधा ॥ २ ॥ कोटिशश्च करोत्येष प्रत्यगात्मा
नमात्मना ॥ सात्त्विकस्योत्तमं स्थानं राजसस्येह मध्यमम् ॥ ३ ॥ तामसस्याधमं स्थानं प्राहुरध्या
त्मचिन्तकाः ॥ केवलेनेह पुण्येन गतिमूर्ध्वामवाप्नुयात् ॥ ४ ॥

प्रतिपद्यतेत इत्यनन्तराकारान्रूपाणिचोत्त
ममध्यमाधमानि स्थानानि प्राप्नोति प्रतिपद्यते एतेन प्रधानस्य गुणात्रयमित्यादिना ॥ ५ ॥ ॥

434

ये चेति आदौ मध्येऽन्ते चेति सर्वस्मिन् समाधि मलयमपंचनैनैका द्वितीयस्यैव हृन्नादे तन्वि भ्रमति सर्पेन्द्रवरदाऽदर्शि
दर्शितमित्यर्थः ॥ १४ ॥ प्रकृतिरविषाणस्तम्भिम्भवो धवन्तराविदिनवतउन्मीलननिमीलनवत्सुगुणानामुदय
दीन विकृतेर्विशेषेणाविष्कृतेनमकैरानीतिमकृतिपदस्यस्यमानि दर्शितानि चेत्तेवत्तायामि

एषा ते प्रकृती राजन्विभ्रान्तिरनुदर्शिता ॥ आदौ मध्ये तथान्ते च पश्यत्वेन तत्त्ववित् ॥ १५ ॥
प्रकृतिर्गुणान्विकुरुते स्वच्छन्देनात्मकाम्यया ॥ क्रीडार्थं तु महाराज शतशोऽथ सहस्रशः ॥ १६ ॥ यथा
दीपसहस्राणि दीपान्मर्त्याः प्रकुर्वते ॥ प्रकृतिस्तथा विकुरुते पुरुषस्य गुणान्बहून् ॥ १७ ॥ सत्त्व
मानन्द उद्रेकः प्रीतिः प्राकाश्यमेव च ॥ सुखं च शुद्धिमारोग्यं संतोषः श्रद्दधानता ॥ १८ ॥ अकार्प
ण्यमसंरम्भः क्षमा धृतिरहिंसता ॥ समता सत्यमानृण्यं मार्दवं ह्रीरचापलं ॥ १९ ॥ शौचमार्ज
वमाचारमलौल्यं हृद्यसंभ्रमः ॥ इष्टानिष्टवियोगानां कृतानामविकत्थनं ॥ २० ॥ दानेन
चानुग्रहणमस्पृहत्वं परार्थता ॥ सर्वभूतदया चैव सत्त्वस्यैते गुणाः स्मृताः ॥ २१ ॥ रजो
गुणानां संघातो रूपमैश्वर्यविग्रहे ॥ अत्याशित्वमकारुण्यं सुखदुःखोपसेवनम् ॥ २२

त्रिष्वेतेः संज्ञायां किंच ॥ स्वच्छन्देनेति मे स्वातन्त्र्याभाव उक्तः आत्मकाम्यया क्रीडार्थं चेति भोक्तृभो
गो ताफलमुक्तं ॥ १५ ॥ दीपदृष्टान्तेन क्रीडाविषयाणामानन्त्यमुक्तं तेन परिणामक्रमेणामोक्ष
फलमपि यत्नं विना स्वयमेव भविष्यतीति मत्वा या सेनकार्यानिदर्शितं ॥ १६ ॥ गुणविकारा
नेवाह सत्त्वमित्यादिना ॥ सत्त्वधैर्यं उद्रेकः पश्चैर्यं शोषस्पष्टार्थं ॥ २२ ॥

स॰भा॰
मो॰
४३५

उभयोरप्यनित्यत्वहेतुनत्वमत्वानः प्रकृतेश्चेतनत्वमादित्यतिप्रनादीत्यादिना प्रमनंतंचप्रदप्रत्वेनच
नित्यानुमेये प्रधाने पुरुषे च नत्वमनत्वयोरनादित्वेन नतस्त्राप्रकंप्यगुणाभ्युगणत्वेप्रगुणाः सति
त्वादिदोषः गुणोस्ते गत्वादिः प्रप्रस्तुतस्वभावाविमर्थः ॥ १२ ॥ प्रथाप्रनत्वाच्चतयोर्वेलदाणेननित्येतरेम
कालिमाहात्म्यप्रसाविति ॥ १४ ॥ एवं पुंसप्रनन्तत्वेपि प्रलित्वेकयोश्चेतन्त्रप्रत्ययोरिवपुंप्रकृत्योर्गुणप्रत्ताशाः
वयपेभावात् ॥ प्रलित्वेवाकेवलत्वप्रकृत्याविपुरुषत्वेकयोपुंसोविभुत्वेन प्रकृतेरविनाशेन चेतदस

ननकर्तृवाच्यः अनादिरिति धनावेतानुभावेवमहामते ॥ अमर्त्तिमंतावचलावप्रकंप्यगुणाभ्युग्गौ ॥ १२
अवाप्राक्षेपिणा हेलकथमेकोप्यचेतनः ॥ चेतनावांस्तथा चैकः देवन्ततुरिति भाषितः ॥ १३ ॥ वे
हिविभेद्कात्मेन मोक्षनथमभूपासते ॥ साकल्ये मोक्षनथमस्यप्रोतुमिच्छामितत्वतः ॥ १४
प्रलित्वेकेवलत्वे च विनाभावेतथैव च ॥ देवतानिचमेब्रूहि देहे यान्याश्रितानि वै ॥ १५ ॥

वात् ॥ ननु तर्कमते प्रात्ममनसोरिव पुंप्रकृत्योर्नित्ययोर्योगेपि फलोपहितो विलक्षणः संयोगोस्मिं
स च कादाचित्क इति तद्भावान्मोक्षहेतुत्वं केवलत्व पुंस्यनरमाशंकाह विनाभावमिति नि
रवयवे पुंसि प्रव्याप्यवर्तिनः संयोगस्यैवासम्भवात् ॥ अभ्युपगमेपि नत्वादिवत्प्रदेशभेदाभावे
ननहेलक्षणस्यस्तन्तरासंभवाच्च दृष्टानि केवलत्वांसंयोगासिद्धोः दृश्यमानस्य संयोगः
सामिथ्यात्वमतेरणा विनाभावोनसंभवति ॥ मिथ्यात्वे च मसत्तादिप्रमाणविरुद्धमिमाशयः १५

४३५

१ निरूपणं तामर्थमाह पुण्येति ॥ ८ ॥ पुण्यपापे इति वियोगे हेतुस्तानि नामधेयेभ्य इत्याह ॥ तत्वज्ञसंगमात
त्वेशाप्य पुण्यपापविमुक्तो भवतीत्यर्थः अबीजं निरवद्यं ॥ ८ ॥ अव्यक्तस्य अव्यक्तः मनैवशरीराणीति ॥ १

पुण्यपापेन मानुष्यमधर्मेणाप्यधोगतिं ॥ द्वंद्वमेषां त्रयाणां तु सन्निपाते च तत्वतः ॥ ५
सत्वस्य रजसश्चैव तमसश्च श्रुणुष्व मे ॥ सत्वस्य तु रजो दृष्टं रजसश्च तमस्तथा ॥ ६ ॥ तमसश्च
तथा सत्वं सत्वस्याव्यक्तमेव च ॥ अव्यक्तः सत्वसंयुक्तो देवलोकमवाप्नुयात् ॥ ७ ॥ रजः सत्व
समायुक्तो मानुष्येषूपपद्यते ॥ रजस्तमोभ्यां संयुक्तस्तिर्यग्योनिषु जायते ॥ ८ ॥ राजसैस्ता
मसैः सत्वैर्युक्तो मानुष्यमाप्नुयात् ॥ पुण्यपापवियुक्तानां स्थानमाहुर्महात्मनां ॥ ९ ॥
शाश्वतं चाव्ययं चैवमक्षरं चामृतं च तत् ॥ ज्ञानिनां संभवं श्रेष्ठं स्थानमव्रणमच्युतं ॥ १० ॥
अतीन्द्रियमबीजं च जन्ममृत्युतमोनुदं ॥ अव्यक्तस्थं परं यत्तत्पृष्टस्तेहं नराधिप ॥ ११ ॥ स ए
व प्रकृतिस्थो हि तस्थुरित्यभिधीयते ॥ अचेतनाश्चैव मतः प्रकृतिस्थश्च पार्थिव ॥ १२ ॥ ए
तेनाधिष्ठिताश्चैव सृजते संहरत्यपि ॥ १३ ॥

नीति तथा ॥ अव्यक्तद्वारा माप्य मिश्रयर्थः
किं मेन्त्रषा रत्न वचेत्याह ॥ स एवेति प्रकृतिः स्वरूपे निष्प्रकृ टस्थरावस उपचारात्प्रकृतिस्थः
सच्यते घटाकाशो गतिरिवास्मिन्प्रकृतिस्थत्वमारोप्यते ॥ १२ ॥ एतेनाधिष्ठितानकस्येन प्रकृतिलोहवत् १

म॰ भा॰
मो॰
५५

अचेतनभोक्तृत्वाभोक्तृत्वे वै लक्षणेन पतत् अव्यक्तं प्रधानं स्वभावतः। अचेतनमपि तद्दृश्यात् ततो भोक्तुः
सकाशाद्दृश्यत्वाद्विपरीतं अभोक्तृ न स्यात् कथं जडे भोक्तृत्वमतः अदृश्यत्वान्नित्यत्वाच्चेति तदात्मना
न विद्विदाम्यकत्वात् स्वभोक्तृत्वेन न तत्काङ्क्षकुप्यव द्वे तनोशास्त्रोक्तेष्वर्थः। नित्यत्वाच्च भोगाभो
क्तृविभागस्यानकस्मिद्दोषऽस्यार्थः॥ ५ ननु जनककाङ्क्षयोरिति तत्स्वभावयोः संज्ञे घोरेऽ ननु का

अनेन कारणेनैनेन दृश्यते स्याद्धेतुने॥ नित्यत्वाच्चावरत्वाच्च स्वरत्वान्न तु दृश्यया॥ ५
यदात्मानेन न कुर्वीत गुणसंसर्गः पुनः पुनः॥ यदात्मानं न जानीते तदात्मापि न मुच्यते
६ कर्तृत्वाच्चापि योगानां योगधर्मेन योच्यते॥ कर्तृत्वाच्चापि योगानां योगधर्मः न
योच्यते॥ कर्तृत्वान्मक्तोनां चतया प्रकृतिधर्मिणः॥ कर्तृत्वाच्चापि वीजानां वी
जधर्मेन उच्यते॥ गुणानां प्रसवत्वाच्च प्रलयत्वात् तथैव च॥ ७ ॥॥॥

क्षकाङ्क्षयोरिति विदवितो संवंधोऽनित्यपदस्यापोकात्॥ यदेति॥ अज्ञानेनेति छेदः गुणसं
सर्गः गुणसंसर्गं अघोपदाशादोयस्मादर्थे यदिति पाठः स्वच्छः यस्मादध्यात्मिकोऽयमज्ञानकृ
त आत्मनि गुणसंसर्गः तस्मात् यावदात्मानं असंगं न जानाति तावन्न मुच्यते इत्यर्थः॥ ६॥ अ
मुक्तिहेतुमाह कर्तृत्वादिति स्यादित्यादि नामाकृतेन महदादितत्त्वकर्तृत्वेनायमपि कर्ता यतो भ
वत्यतो न मुच्यत इत्यर्थः॥ ॥ मक्तोनां अज्ञानां॥ ॥ वीजानां स्थावराणां गुणानां कामप्रमादी

436

ता

उत्क्रामिण उत्क्रांतस्य विषयत्वाभिप्रायेणाप्य ॥२४॥ शरीराणि स्थूलसूक्ष्माणि ॥२॥ प्रातीपदिकेन चत्वा
रि यः कथमेकोऽयं चेतनः इति चेतनत्वाविभागमाक्षिपतस्तं वा भावपिनिके चेतनैर्नोवासां समैतानां यः जग
दाश्रयसंगानां नाम्यः इष्यमानस्य रूपविभागस्य तु इष्टत्वात् अयथार्थमलये चेतनावेवं भ॰

नैवोत्क्रामिणः स्थाने देहिनो वैविपयतः ॥ कालेन यद्धिमामोति स्थानेनान्तजिवीहिमे ॥६
सोऽस्मत्तानं चनत्वेन दृष्यगेणगनैव च ॥ शरीराणि चतत्वानि वक्ष्यहेस्मिन्नम ॥२॥ विदि
तसर्वमनते याणावामल्लक यथा ॥ शानैमोदधर्मे शुभामव ल्वाजनकसंवादे ॥ यामव
ल्वावाच ॥ नशक्योनि र्गुणस्तान गगुणीकर्तुं विशांयते ॥ गुणवाश्वाप्यगुणवान् यथातत्त्वनि
बोधमे ॥ ॥ गुणैर्हि गुणवानेन निर्गुणश्चागुणस्तथा ॥ माहुरेवं महात्मानो मुनयस्तत्त्वद
र्शिनः ॥ २ ॥ गुणस्वभावस्त्वव्यक्तो गुणान्नैवाभिवर्तते ॥ उपयुंक्ते च तानेव सचैवाज्ञः स्वभा
वतः ॥ नमनः परमोऽस्तीति नित्यमेवाभिमन्यते ॥५ ॥

भवतः ॥ एवमनादिसंयोगात्रेतना चेतनावपि तौ चेतनावेवं भवतः इति ॥ येन दर्पितस्वभावस्या
परिहार्यत्वादिस्याह ननुरावरइति ॥ स्वभावतः अज्ञो यितेन यत्त्वेन उपयुंक्ते तान् ॥ ३ ॥ नाहिं मत्स्यो॰
मोक्षाविंतु हृदयं हमाणकेनेत्याहनिशम्यानइति अव्यक्तात्र इत्यः इगात्मानमानीति नभुंक्ते च यत मतश्रा
त्मनोऽन्यं भोगामर्थं नपश्यतीत्यभमन्यत इति वृत्यानाभिप्रायेणोक्तः ॥ ५ ॥ रामायनमः

म॰भा॰
५६२
मो॰

१९॥ न त्वामस्मात्रविशेषः॥ २०॥ चत्वारि पादाः षोडश तन्नमः सांख्यज्ञानमिति॥ एकेव चर्या शमायनु

अन्यच्च मशकं विद्यादन्यच्चोडुंबरं तथा॥ न चोडुंबरसंयोगैर्मशकस्तत्र लिप्यते॥ १३॥ अन्य एव तथा मत्स्यस्तदन्यदुदकं स्मृतं॥ न चोदकस्य स्पर्शेन मत्स्यो लिप्यति सर्वशः॥ १४॥ अन्यो ह्यग्निरुखाप्यन्या नित्यमेवमवैहि भोः॥ न चोपलिप्यते सोग्निरुखासंस्पर्शनेन वै॥ १५॥ पुष्करं त्वन्यदेवात्र तथान्यदुदकं स्मृतं॥ न चोदकस्य स्पर्शेन लिप्यते तत्र पुष्करं॥ १६॥ एतेषां सहवासं च निवासं चैव नित्यशः॥ याथातथ्येन पश्यंति न नित्यं प्राकृता जनाः॥ १७॥ ये त्वन्यथैव पश्यंति न सम्यक् तेषु दर्शनं॥ ते व्यक्तं निरयं घोरं प्रविशंति पुनः पुनः॥ १८॥ सांख्यदर्शनमेतत्ते परिसंख्यानमुत्तमं॥ एवं हि परिसंख्याय सांख्याः केवलतां गताः॥ १९॥ ये त्वन्ये तत्त्वकुशलास्तेषामेतन्निदर्शनं॥ अतः परं प्रवक्ष्यामि योगानामनुदर्शनं॥ २०॥ शां॰ तै॰ मो॰ त धर्मेषु याज्ञवल्क्यजनकसंवादे॥ याज्ञवल्क्य उवाच॥ सांख्यज्ञानं मया प्रोक्तं योगज्ञानं निबोध मे॥ यथाश्रुतं यथादृष्टं तत्त्वेन नृपसत्तम॥ १॥ नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलं॥ तावुभावेकचर्यौ तु उभावनिधनौ स्मृतौ॥ २॥ पृथक् पृथक् प्रपश्यंति येल्पबुद्धिरता नराः॥ वयं तु राजन् पश्याम एकमेव तु निश्चयात्॥ ३॥ यदेव योगाः पश्यंति तत्सांख्यैरपि दृश्यते॥ एकं सांख्यं च योगं च यः पश्यति स तत्त्ववित्॥ ४॥

ज्ञाने च योगिनो अनिधनो मृत्युनाशको॥ ४ इत्यपि तिडभौ इति द्वितीयो नमनुदृश्यते॥ ३॥ ४॥

437

५५

त

नन्वेवंविधस्य कथं केवलत्वं स्यादित्यत आह ॥ नपेक्षत्वादिति उपसमीपे स्थित्वाईक्षते इत्युपेक्षः साक्षीन सा लोऽविक्रियेन वरोनालोकइवासः केवलत्वमस्य युज्यते यथोक्तं नेत्रं स्यादिक्रियाद्दुःखौ साक्षिता कास्किकारि णः धीविक्रियासहस्राणां साक्षिमोदमविक्रियत इति ननु साक्षित्वमस्तु मा वाप्यनेहस्तेवदनोषदुःखं न परिहार्यमित्याशंक्याह अनन्यत्वादिति नास्य नोस्मादिन्यनन्यस्तत्वात्तद्दुःखौ दुःखं तद्रूपतापयसत्वा त्मनिमित्तं वधः कृतस्तर्हि दुःखभानमत आह ॥ अभिमानादिति यदा हि पुरुषात्मीयमन्यते तदा तद्दुःखे न दुःखी भवति नान्यथा एवं धीनादात्म्यानधौ दुःखी नेवास्य दुःखात्वं त्वियस्यागतत्केवलत्वेनित

व्यक्त॰

उपेक्षत्वादन्यत्वादभिमानाच्च केवलं ॥ मन्यन्ते यतयः सिद्धा अध्यात्मज्ञा गतज्वराः
अनिमित्तं निमित्तमव्यक्तं येन हि ग्रस्तम ॥१॥ अव्यक्तैकत्वमित्याहुर्नानात्वं पुरुषास्तथा
सर्वभूतदयावन्तः केवलं ज्ञानमास्थिताः ॥१९॥ अन्यः स पुरुषोऽव्यक्तस्त्वध्रुवो
ध्रुवसंज्ञकः ॥ यथा मुञ्ज इषीकाणां तथैवैतद्धि जायते ॥१२॥

सिद्धमिति पनेन अस्तित्वकेवलत्वं विनाभावानामात्मासंदेपः परिहृतो ज्ञेयः ॥१०॥ अनिम मितिद्वानिमित्तं परिणामि निमित्तमपरिणामि अव्यक्तं कारणं व्यक्तं कार्यमिति ॥१॥ तत्रमतांतरमा ह ॥ अव्यक्तस्यैकत्वं पुरुषाणां बहुत्वं अव्यमापुरुषाणां नानात्वमिति आहुरनिरीश्वरसांख्यास्ता न्निषिनष्टि सर्वेमहेन ॥११॥ पुरुषस्यो भेदमनेकदृष्टान्तैरेकमाह ॥ अन्यइत्यादिना अव्यक्तमिति छे दः ॥१२॥ इषीकाणां वा सो यथा मुञ्जगर्भे पृथुसौवासा अव्यक्तात्परमर्थः अतिसुगोपनमज्ञः पुरु षोत्वगात्मसदाजननानादृश्यसन्निविष्टः तत्साक्षरे रात्महृदेह्मनादिवर्षीकाये यथानेविया

कृष्णकृतविवृति ॥ १२ ॥

ग.भा.
टी.
४४२

सा धारणमाह॥ धारणमिति प्राणायामः प्राणनिग्रहः एवं च मनसः षोडशस्वाधारेषु धारणं नेत्रविषयेषु योगे योगिनः
मध्ये मे ते षोडशाधारान्वक्ष्ये यामि विशेषनरस्यादिना॥ पादांगुष्ठपार्ष्णिमूलस्थानं योनेराधारे षोडशं निर्मिताः
पृष्ठायां तत्त्वस्थानानि॥ प्राणरोधे हृत्वा मूर्धा दशस्थानानि स्थानेन समाहृत्यमादिना दर्शितानाथाः प्राणवायोस्तत्त्वं
स्थानानां पञ्चपञ्चस्तन्धारणा ज्ञेया। पादादिजानुपर्यन्तं पृथिवीस्थानमुच्यते॥ आजानोः पायुपर्यन्तमपां स्थानं प्र
कीर्तितं॥ आपायोर्हृदयान्तं च वह्निस्थानं तदुच्यते॥ हृन्मध्यात्तु भ्रुवोर्मध्यं यावद्वायुकुलं भवेत्॥ आभ्रूमध्यात्तु मूर्धान्त
माकाशस्थानमुच्यते॥ पृथिव्यां धारयेद्ब्रह्माणं ब्रह्माणं परमेष्ठिनं॥ विष्णुमग्नौ तले रुद्रं मूर्ध्नि सदाशि
वं तथाकाशे धारयेत्सु समाहितः॥ पृथिव्यां वायुमास्थाय लकारेण समन्वितं॥ ध्यायंश्चतुर्भुजाकारं ब्रह्मा
णं सृष्टिकारणं॥ धारयेत्पञ्च घटिकाः पृथिवीजयमाप्नुयात्॥ वारुणे वायुमारोप्य वकारेण समन्वितं॥ स्म

धारणैवमनसः प्राणायामश्च पार्थिव॥ एकाग्रता च मनसः प्राणायामस्तथैव च॥५॥

रन्नारायणं देवं चतुर्बाहुं स्मितीक्षितं॥ शुद्धस्फटिकसंकाशं पीतवाससमच्युतं॥ धारयेत्पञ्च घटिकाः स
र्वरोगैः प्रमुच्यते॥ वह्नौ चानिलमारोप्य रेफाक्षरसमन्वितं॥ अक्षं वरप्रदं रुद्रं तरुणादित्यसन्निभं॥ भस्मोद्धू
लितसर्वाङ्गं सुप्रसन्नमनुस्मरन्॥ धारयेत्पञ्च घटिकाः वह्निनासौ न दह्यते॥ मारुते मारुतं स्थाने वर्णेन समन्
न्वितं॥ धारयेत्पञ्च घटिका वायुवद्व्योमगो भवेत्॥ आकाशे वायुमारोप्य हकारोपरि शंकरं॥ बिन्दुरूपं म
हादेवं सर्वलोकैककारणं॥ चिन्तं न चिन्तयेद्दृश्यमन्तं तं मपि धारयेत्॥ तथैव युक्तः इत्थं तं लोके त्रिके सि
द्धिनेरिति॥ निर्गुणमाह॥ एकाग्रतेति॥ एकमेव ध्यायेत् ध्येयध्यानविभागस्मृतं॥ वस्तुग्रहं यत्तदेकाग्रं
निर्वृत्तिर्वृत्तिस्वभाववत्तामनसः बुद्धेः अग्रं प्राणाः इन्द्रियाणि समनस्कानि तेषां प्राणायामो निग्रहः प्रा
णायामः तथाह श्रुतिः॥ यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह॥ बुद्धिश्च न विचेष्टति तामाहुः परमां ग

438

शिवगीता
४४२

उत्क्रमणकाले देहिनो रन्ध्रं नीनि हृद्याः प्राणाः सुषुम्णायाश्च तामेव प्रधानभूतां न्यालुवनाविशुद्धता
नेन याच सूत्रं खेचरं न विधारणाभ्यासमार्गः स्वविषयवती चा महत्तिहमहान्मनसः स्थितिनिबंधि
नी ॥ मच्छेदन खेचरः विधारणा रसकरकः कुंभकः तथा नासिकाग्रधारणातो बंधसंवित् जिह्वाग्रे रस
संवित् तालुनि रूपसंवित् ॥ जिह्वामध्ये स्पर्शसंवित् ॥ जिह्वामूले शब्दसंवेत्ति तत्र वायुधारणया
फले विचारेति ॥ दिशो दश खेचरत्वं प्राप्नुवतीत्यर्थः ॥५॥ अथ षड्गुणेन पशुं दुःखक्रमेण तत्त्वपारो

हृत्प्रधानानपरान् तु विद्धि योगानरिंदम ॥ तेनैव चाद्य देहेन विचरंति दिशो दश ॥५॥ या
वद्विमलयत्नात् सूक्ष्मणा षड्गुणेन हि ॥ योगेन लोकान् विचरन्सर्वसन्यस्य चानघ ॥६॥
वेदेषु चाष्टगुणिनं वेदमाहुर्मनीषिणः ॥ सूक्ष्ममष्टगुणं प्राहुर्वेतरं नृपसत्तम ॥७॥ द्वि
गुणयोगयुक्तं त्वं योगानामाहुरंजम ॥ सगुणं निर्गुणं चाथ यथाशास्त्रनिदर्शनम् ॥८॥

रेणासस्य स्यसन्यासं च देहस्य सत्त्वं यथेष्टं क्रमण तथ रक्तं फलं मोदांते भुयोगधर्मेषु प्रदोमादनार्थ
गुणं नतयोगिनामणुभ्यादयरणीयं ॥६॥ वेदेष्विति अष्टगुणितं अणिमाद्यष्टगुणवं तेन निजयोगसमर्थो
यः अष्टगुणं अष्टांगधारणया मं ॥ प्रत्याहारो ध्यानधारणा तर्कः समाधिः षडंगाइति मैत्रायणीयो
पनिषदादिषु वेदोगानुक्तानि तथापि यमाद्यं सुआसनं तेतो काभ्यां सहाष्टसंख्यावो ध्या । अष्टसूक्ष्म
मित्यत्र केः पर्वैसस्य स्थूलत्वमेवाधिकारित्वं चोक्तं ॥ तर्कोयोगे सिद्धि रूपस्य तत्त्वदोषोत्पने ॥७॥
द्विगुणाद्दि प्रकारं तदेवाह ॥ सगुणं सबीजं निर्गुणं निर्बीजम् ॥८॥ ॥

निःपायाः १ निद्रादयः एवं ज्ञाः द्वाविंशति चोदना एवाग्रसंक्षेपेण द्वादश चार्थे यांतरेण गीताः यथो
क्तं शिवयोगे मूलाधारे त्रिधावर्तं ब्रह्मचक्रं भगोपमं तत्कंदे अग्निं तिसं ध्यायेद्बुधः सर्वकामप्रदं॥ १
स्वाधिष्ठाने ततश्चक्रं तन्मध्ये च प्रवालांकुरं नमदेवोड्डीयने ध्यायेत्पश्चिमाभिमुखं शिवं॥ २ पंचावर्तं ना
भिचक्रे मध्ये सर्पाकारेण त्रिवलितां कुंडलिनीं ध्यायेद्बुधः सर्वसिद्धिदां॥ ३ अधोमुखं ह्वाष्टपत्राब्जं
हृच्चक्रं मितं हंसः॥ तन्मध्ये कर्णिकां ध्यायेज्ज्योतिर्लिंगाकृतिं विभो॥ ४॥ षोडशं कंठचक्रं च तत्र तु वामे तद्द
क्षे॥ इडापिंगलयोर्ध्यायेत्सुषुम्नां मध्यसंस्थितां॥ ५॥ षष्ठं च तालुचक्रं घंटिकालिंगमूलं तद्दांतं दंतकं॥ ध्यायेत्

निःपायाः प्रथमे यामे चोदनाद्वादशाः स्मृताः
मध्ये स्वमात्यरे यामे द्वादशैवनु चोदना॥ १०॥

दशमद्वारं तत्सप्तमं सर्वसिद्धये॥ ६॥ भ्रूचक्रं सप्तमं ज्ञेयं नासिकानाले केंदं स्वस्वाकारं॥ ध्यायेद्दीपशिखाकारं तन्मध्ये
लोचनं॥ ७॥ ब्रह्मरंध्रे ष्टमं चक्रं निर्वाणाख्यं सूक्ष्मरंध्रं तत्र नालं धूमं ध्यायेत्सूक्ष्ममोक्षप्रदं ततः॥ ८॥ आकाश
बीजं नवमं ऊर्ध्वशक्ति त्रिकूटके ऊर्ध्वं शक्तिं ध्यायेत्तत्र ऊर्ध्वं पूर्णानंदमभेदात्स्वरूपं ध्यायेच्च साक्षात्सरोजमध्ये ९
आकाशबीजं हकारः तत्स्मरणात् ऊर्ध्वं शिरसि ऊर्ध्वं नभमाकाशमात्रं ध्यायेत् एता नव चोदनाः वायुनिग्रह
गर्भिताः ततः अन्यान्यपरे समस्तकार्ये मनो धारयेत् ततः कारणं ततो निष्कलं इति निःश्च एवं द्वादश
चोदनाः एवं रात्रौ आवर्तयेत् को निद्रां गृहीत्वा पश्चात्तु नृ द्वादश एता एवाभ्यसेत् इत्यर्थः॥ ११॥

439

सगुणनिर्गुणयोरंगांगिभावमाह प्राणायामो हीति ॥ निर्गुणं निर्हेतिके धारयेत् स्थिरं प्र-
त्यः यादीति अहरहर्यणति अहरहर्श्यमाने मोचनस्थाने यदि वा गुंम्भश्चभवति तर्हि वातातिकं भवमेव ।
प्रथमं थः ४ रकादीनां मूलाधारादीनां च देवताधिकं ध्यायन् ॥ यो वा पृथा रंगा करोति तिस्मति
सिध्यति ध्यानवर्जितेतन्त्र्यभ्यस्यमवश्यं वा ध्यतइति ॥ यथोक्तं पवनयोगसंग्रहे ॥ प्राणायामेनयुक्ते

प्राणायामो भवेत्सगर्भो निर्गर्भो धारयेन्मनः ॥ यद्यदृश्यति सर्वं वै
प्राणान्नैस्थिलसत्तम ॥ वातातिको भवेयेव तस्मात्तत्र समाचरेत् ॥ १ ॥

नसर्वे योगतत्त्वो भवेत् । प्रकृताभ्यासयोगेन महारोगसमुद्भवः ॥ तिष्ठुक्तेन देवताध्यानयुक्तेन
देवतास्वयात्तत्त्वकालाः नीलोत्पलदलश्यामं नाभिमध्ये व्यवस्थितं ॥ चतुर्भुजं महात्मानं
नप्रत्वेकाविचिंतयेत् कुंभकेन हृदिस्थाने ध्यायेत्तु कमलासनं ॥ ब्रह्माणं रक्तगौरांगं चतु-
र्वक्त्रं पितामहं ॥ ३ चक्रेनेश्वरं विद्यालललाटस्थमहेश्वरं ॥ शुद्धस्फटिकसंकाशं निर्मलं पापनाशनं

१९॥ पाषाणादिवेति परमेवे च॥ २० युक्तस्य लक्षणमुक्त्वा युञ्जन्निमाह॥ नैलेति॥ उत्तरत्र लक्षणं तत्र
कात्रमनसा लक्षणमिति निश्चयः॥ २१ स्थिरत्वात् बहिर्मुखत्वनिवृत्तेः निश्चलत्वात्॥ अन्तरम

निर्वातेन यथा दीपो ज्वलन्नेव हि समन्वितः॥ निश्चलो ध्येयशिखस्तद्वद्युक्तमात्मनो मनीषिणः
१९॥ पाषाणादिव मे चेतो स्थैर्यं यात्विंद्रियविराहतेः॥ नालं बालपितं शक्तस्तथा युक्तस्य लक्षणं॥ २०
शान्तं तुष्टं निर्वाणं विविधे गीतवादिते॥ त्रियमाणेन कम्पेत युक्तस्तेन त्रिदर्शने॥ २१॥
तैलपात्रं यथा पूर्णं कराभ्यां गृह्य पूरुषः॥ सोपानमारुहेद्भीतस्तर्ज्यमानोऽसिपाणिभिः
२२॥ संयतात्मा भयात्तेषां तथा पात्राद्धि बिन्दुमत्॥ न च्यावेत्तरमागत्य एकाग्रमनसस्तथा
२३॥ स्थिरत्वादिन्द्रियाणां निश्चलत्वात्तथैव च॥ एवं युक्तस्य तु मुनेर्लक्षणान्युपलक्षये
त्॥ २४॥ स्वयुक्तः पश्यते ब्रह्म यत्तत्परममव्ययं॥ महतस्तमसो मध्ये स्थितं ज्वलनसन्निभम्
२५॥ एतेन केवलं याति त्यक्त्वा देहमसार्विकं॥ कालेन महता राजन्नश्रुतिरेषा सनातनी

केवलत्वात्॥ २४ महतः महतत्त्वस्य मध्ये स्थितं तत्त्वपपदार्थं तमसो मध्ये स्थितं तमपदार्थं ज्वलनसन्निभमेव वि
ल्मात्रं नद्भयनिष्ठ॥ २५ एतेन दर्शनेन केवलं मोक्षं देहमसार्विकं त्यक्त्वा चिदन्तानान्तहतिरस्तीतिभा

440

एवं वायुधारणाद्युपायेन दुर्दांतं मनो निगृह्य उपशांते नन्तत्वमतिपत्तियोगेन एकाग्रशीलिना ए
काग्रिनासन्यासिनेत्यर्थः आत्मन्येव नत्तुलादौ आरमणं यस्य तेन आत्मारामेण तु देहेन शास्त्रनत्ववि
दा आत्मा योक्तव्यः समाधिः कार्यः ॥२२॥ कथं योक्तव्य इत्यत आह पंचानामिति । दोषान् अप्रमानसूक्ष्मरूपा
न् आत्मनमपि शब्दादिके च आदित्य निरस्य यत्नेन प्रत्याहारं कुर्यात् ॥२३॥ प्रतिभा विद्येयं अपवर्गे लयं

तदेवमुपशांतेन दांतेनैकाग्रशीलिना ॥ आत्मारामेण बुद्धेन योक्तव्योत्मा न संशयः ॥२२॥ पं
चानामिंद्रियाणां तु दोषानाक्षिप्य पंचधा ॥ शब्दं रूपं तथा स्पर्शं रसं गंधं तथैव च ॥२३॥ प्रति
भामपवर्गं च प्रतिसंहृत्य मैथिल ॥ इंद्रियग्राममखिलं मनस्यभिनिवेशयेत् ॥२४॥ मनस्तथैवं
अहंकारे प्रतिष्ठाप्य नराधिप ॥ अहंकारं तथा बुद्धौ बुद्धिं च प्रकृतावपि ॥२५॥ एवं हि परि
संख्याय ततो ध्यायति केवलं ॥ विरजस्कमलं नित्यमनंतं शुद्धमव्रणम् ॥२६॥ तस्थुषं पु
रुषं नित्यमभेद्यमजरामरम् ॥ शाश्वतं चाव्ययं चैव ईशानं ब्रह्म चाव्ययम् ॥२७॥ युक्तस्य
तु महाराज लक्षणान्युपधारय ॥ लक्षणं तु प्रसादस्य यथा तृप्तः सुखं स्वपेत् ॥२८॥

प्रतिसंहारे युक्तिमाह इंद्रियेति ॥२४॥ बुद्धौ महत्तत्वे ॥२५॥ परिसंख्याय प्रविलाप्य अलेशमत्र्यंति
त्यनन्त्वाकाशादिवत् अवहार्य निर्मले ॥२६॥ तस्थुषं तस्थिवांसं स्थाणुं कूटस्थमित्यर्थः नित्यमभेद्यं
अज्ञानादिभिः जीवेश्वरभावेन मायया भिद्यमानमपि आकाशवदभेद्यं अव्ययं अनन्वयं
व्ययं ब्रह्मसम्भवं ॥२७॥ युक्तस्य समाधिस्थस्य सुखं स्वपेदिति स्वसंवेद्यलक्षणं ॥२८॥ ॥ ॥

मस्तं निहितं ज्ञात्वापि हितमाचरेदित्याशयेनाह अरिष्टानीति ॥ १ ॥ प्रकृतेर्विक्रियादानं क्रापेण
कृपणस्यधान्त्यमित्यादि ॥ ११ ॥ कृष्णस्य पर्णावर्कविधूसरतानाच्छायापातिमेरणाचिह्नं ॥ १२

अरिष्टानि प्रवक्ष्यामि विहितानि मनीषिभिः ॥ संवत्सरवियोगस्य संभवेति शरीरिणः ॥ १
योऽरुन्धतीं न पश्येत ध्रुवं चैव कदाचन ॥ तथैव ध्रुवमित्याहुः पूर्णेन्दुं दीपमेव च ॥ ५ ॥ खण्डा-
भासं दक्षिणतस्तेऽपि संवत्सरायुषः ॥ आतिथ्येऽनिरतिमन्ता अमन्तावायुनिल्सया ॥ ५ ॥ परच-
क्षुषि चात्मानं ये न पश्यन्ति पार्थिव ॥ आत्मच्छायाकृतीभूतं तेऽपि संवत्सरायुषः ॥ अतिद्यु-
तिरतिप्रज्ञा अप्रज्ञा चाद्युतिस्तथा ॥ १० ॥ प्रकृतेर्विक्रियापत्तिः षण्मासान्मृत्युलक्षणं ॥ दै-
वतान्यवजानाति ब्राह्मणैश्च विरुध्यते ॥ ११ ॥ कृष्णश्यावच्छविच्छायः षण्मासान्मृत्युलक्ष-
णं ॥ १२ ॥ शीर्णनाभि यथा चक्रं छिद्रं सोमं प्रपश्यति ॥ १३ ॥ तथैव च सहस्रांशुं सप्तरात्रेण
मृत्युभाक् ॥ १३ ॥ शवगन्धमुपाघ्राति सुरभिं प्राप्य यो नरः ॥ देवतायतनस्थस्तु सप्तरात्रे-
ण मृत्युभाक् ॥ १४ ॥ कर्णनासावनमनं दन्तदृष्टिविरागिता ॥ संज्ञालोपो निरूष्मत्वं सद्यो-
मृत्युनिदर्शनं ॥ १५ ॥ अकस्माच्च स्रवेद्यस्य वाममक्षि नराधिप ॥ मूर्द्धतो धूमश्चोत्पतेत् सद्यो मृ-
त्युनिदर्शनं ॥ १६ ॥ एतावन्ति त्वरिष्टानि विदित्वा मानवोऽत्मवान् ॥ निशि चाहनि चात्मानं यो-
जयेत्परमात्मनि ॥ १७ ॥

छिद्रं छिद्रवंतं ॥ १३ ॥ सुरभिद्रव्ये शवगन्धं यस्य ग्रहणे स्पर्शे ॥ १४ ॥ अरिष्टज्ञानफलमाह एवं तीति

441

योगं ज्ञात्वा तत्त्वमार्थं वदंतं कृतकृत्या इति मन्यंते मनीषिणः अनुभवसिद्धं योगं केवलमित्यर्थः तथा
च श्रुतिः ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद संप्रति न स जातु जनः श्रद्दध्यान्मृत्युर्मा मारयादिति २०
एकचत्वारिंशदधिकशततमं केवलमागमिराजयोगफलमुक्त्वा हठयोगफलमाह न येनेवमादिना

एतद्धि योगं योगानां किमन्यद्योगलक्षणं॥ विज्ञाय तद्धि मन्यंते कृतकृत्या मनीषिणः॥२१॥
इति गीतो मोक्षधर्मेषु याज्ञवल्क्यजनकसंवादे॥ याज्ञवल्क्य उवाच तथैवोत्क्रममाणानु शृणुष्वाव-
हितो नृप॥ पद्भ्यामुत्क्रममाणस्य वैष्णवं स्थानमुच्यते॥१॥ जंघाभ्यां च वसून्देवानाप्नुयादिति-
नः श्रुते॥ जानुभ्यां च महाभागान्साध्यान्देवानवाप्नुयात्॥२॥ पायुनोत्क्रममाणस्य मैत्रं स्था-
नमवाप्नुयात्॥ पृथिवीं जघनेनाथ ऊरुभ्यां च प्रजापतिं॥३॥ पार्श्वाभ्यां मरुतो देवान्नासाभ्यामिंदुमेव च॥ बाहुभ्यामिंद्रमित्याहुरुरसा रुद्रमेव च॥४॥ ग्रीवायास्तमृषिश्रेष्ठं नरमाप्नोत्यनुत्तमं॥ विश्वेदेवान्मुखेनाथ दिशः श्रोत्रेण आप्नुयात्॥५॥ घ्राणेन गंधवहं नेत्राभ्यां सूर्यमेव च॥ भ्रूभ्यां चैवाश्विनौ देवौ ललाटेन पितॄनथ॥६॥ ब्रह्माणमाप्नोति विभुं मूर्ध्ना देवाग्रजं तथा॥ एतान्युत्क्रमणस्थानान्युक्तानि मिथिलेश्वर॥७॥ रामः

अथ यस्मिन्नाधारे मूलस्थो वायुरामरणांते प्रियते तत्र दाधारदेवतालोके तेनैवाधारद्वारेणोत्क्रम
गच्छतीति प्रथरत्नार्थः॥१॥ मूर्ध्नि ... यानाप्यानुसारं श्रेणु एतत्क्रमस्य क्लिस्थानेनान्यत्र तथा च श्रु-
तिः शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रम

स. भा.
मो.
४६८

अहंकारेति येन सत्वेन अयं अहंकारो नाम मायेति श्रूयत इति मन्यते सततं सत्वेन दृशो गुणाः सत्व मयेत्यनुद्दिष्टिनिश्चयप्रकाशके ह्यर्थे पि वा स्थाने येतत्प्रकाशकत्वलक्षणं स्वप्रकाशत्वेनात्मा स्पर्शः ॥४॥ कलामात्राण्यहंकाराख्यं वायुर्ज्योतिरापः पृथिवी इंद्रियमनो बुद्ध्यन्ताहीयंतत्पोमेदाः कर्म

अहंकारेति चाष्टधा गुणास्तत्वदृशः ॥ ममायमिति ये नायमन्यतेन ममेति च ॥४॥ अथाप्यपरं द्रष्टारं जानन्गुणास्त्व मापरः स्मृतः ॥ इयं बाला समग्रहस्य सामग्र्या नहि दोषतो ॥५

442

लोकेषु नामवेति अयुताः षोडशातातां समग्रहस्य सामग्र्या वासनात्मकं जगदहंकारत्वमवि यथोक्तं वा क्षिप्येयमहं त्वं जगत्त्रयं पूर्वं मा गामतिष्ठति प्रसरेण रे धीक्षेत्र पद्मपदं वनत्रयमि तिवासनात्यहंकारद्वारा स्वकार्यं जगत्प्रकाशयतीति तत्स्वप्रकाशत्वं स्पर्शः ॥५॥ ५॥ रामः

४६८

ननु वासे समयोजनकं यथा सूर्यश्चंद्ररपेक्षोपि न प्रकाशक एवं चक्षुः सूर्यापेक्षमपि न प्रकाशका
ह॥ ज्ञानेन प्रकाशोजं यज्ज्ञ यादि न यो वै नर वा ले चक्षुरपेक्षयाः परे मनो नाम गुणोस्ति॥१॥ तस्मि
न्नेव मानमाह विचारयतीति निश्चय निमित्तं चक्षुर्निमीलनेपि येन करणेनायं भोक्ता ध्वर
साधनी विचारयति तन्मनः वासानपेक्षप्रकाशकत्वमेव सप्रकाशत्वं तत्त्वदृष्टांते सूर्ये नवा
स्तिन चक्षुषितस्य सूर्यापेक्षत्वात्॥ नापि मनसि तस्यापि चंद्रादौ चक्षुरापेक्षत्वात्॥ अतः

ज्ञानेन यो न रेत तस्मिन् मनो नामापरो गुणः॥२॥ विचारयति येनायं निश्चये साध्य
साधनी॥ द्वादशात्वपरस्तत्र बुद्धिर्नाम गुणः स्मृतः॥ येन संशयशंकाश्च वोदव्यास्तु बुध्य
स्यति॥ अथ द्वादशके तस्मिन् सत्वं नामापरो गुणः॥२॥ महात्मनोस्य संज्ञा वा जेतर्थे
नाम्नमीयते॥३॥

नु स्थितमिदं सप्रकाशत्वलक्षणं अस्य लक्षणस्य बुद्ध्यादिष्वपि सत्त्वाद्वा
रयितुं तेषामपि वासापेक्षत्वमाह॥ द्वादशात्विन्यादि नासंशयपूर्वं बुद्धिः स्वकार्यं
निश्चयं करोतीत्येव समाह्वारसमवाय्यात्मकं मनोपेक्षते इत्यर्थः। एवं सति निश्चयेनाति भिन्ने द्विय
नोस्यपेक्षत्वं बुद्धिर्द्वादशात्वबुद्धेर्व्यमोपादाने सत्वं तस्य रजस्तमोभ्यामसत्ता भिभवेन ध्यानाः
किं चिदस्मि अहमहंतेति स्मात्मत्वादिके देहात्मकत्वेनासंगविदादिके देहात्मकत्वेनात्म
गाविदादिनिश्चयद्वारानुमीयते ज्ञायते अन्तरार्थः स्पष्टः॥३॥ ॥

सा

म.भा.
मो.
५६५

तत्र सप्तकृतिकार्यमाह सुखेति ॥ ७ ॥ व्यक्तिकार्यमाह ऊर्ध्वमिति कालः अविद्याख्यः षोडशो गुणः अ-
न्तः तदुपाधिर्जीवः कालसंज्ञातस्य महदहंकारस्तनामपञ्चात् तत्कृतं तेनादिकालरूपत्वमागतं तमसस्तत्त्व-
विंशस्याभिसंख्यानं ॥ ८ ॥ महाभूतानि देहारंभकाणि अतिरिक्तानि सद्भावयोगः इदंहोतृस्त्रीमादिश्वपदे-
शासद्भावयोगः ॥ इदं होता स्त्री मादिर्देवपदेषु यद्रामनाशेन विषयोः सदसद्भावयोगौ ज्ञेयौ ९
विधिः वासनाबीजभूतो धर्मः शुक्रं वासनोद्बोधकः संस्कारः बलं वा नानाविषयमात्मन्युपलोपनं

सुखदुःखे जरामृत्यू लाभालाभौ प्रियाप्रिये ॥ इति चैकोनविंशोऽयं द्वन्द्वयोग इति स्मृतः ॥ ७ ॥ ऊ-
र्ध्वं चैकोनविंशात्तु कालो नाम परो गुणः ॥ इतीमं विद्धि विंशं त्वं भूतानां प्रभवाप्ययम् ॥ ८
विंशकश्चैष संघातो महाभूतानि पंच च ॥ सदसद्भावयोगौ तु गुणावन्यौ प्रकाशकौ ॥ ९
इत्येवं विंशकश्चैव गुणाः सप्त च ये स्मृताः ॥ विधिः शुक्रं बलं चेति त्रय एते गुणाः परे ॥ १० विंश-
तिर्दश चैव हि गुणाः संख्यानतः स्मृताः ॥ समग्रा यत्र वर्तन्ते तच्छरीरमिति स्मृतं ॥ ११ ॥ अव्यक्तं
प्रकृतिं त्वासां कलानां कश्चिदिच्छति ॥ व्यक्तं वासां तथा चान्यः स्थूलदर्शी प्रपश्यति ॥ १२

संघातधर्मत्वेनैते षोडश व्याहृताः ॥ १० ॥ विंशतिर्दश चेति त्रिंशत्संघातः शरीरं ॥ ११ ॥ अस्य त्रिंशकस्यो-
त्पत्तौ मतान्तराण्याह । अव्यक्तमिति अव्यक्तं प्रधानं प्रकृतिमुपादानं कलानां त्रिंशत्संख्यानां कश्चि-
त् निरीश्वरसांख्यः व्यक्तं परमाणवः चकारात् अव्यक्तं कालादृष्टेश्वरादि स्थूलदर्शी काणादादिः

५
५६५

443

ननु बाह्येन्द्रियप्रयोजनं यथासूर्यचंद्रदीपेत्योपि न प्रकाशक एवं चक्षुः सूर्यादीनपि न प्रकाशका
हः॥ ज्ञानेन प्रकाशेते यत्रूपादिनि योंतराले चंद्रदीपेत्याः परामनो नाम गुणोस्ति॥१॥ तस्मि
न्वेमानमाह विचारयतीति निश्चयनिमित्तं चक्षुर्निमीलनेपि येन करणेनायं भोक्ता ध्यं
साध्यनी विचारयति तन्मनः बाह्यानपेक्ष्य प्रकाशकत्वमेव सप्रकाशत्वं तच्च दृष्टांते सूर्येन वा
स्तिन चंद्रादिषु तस्य सूर्यापेक्षत्वात्॥ नापि मनस्तितस्यापि चेदादौ चक्षुरापेक्षत्वात्॥ अतः

ज्ञानक्षेयांतरे तस्मिन् मनो नामापरो गुणः॥२०॥ विचारयति येनार्थं निश्चये साध्य
साधने॥ द्वादशास्तपरस्तेन बुद्धिर्नाम गुणः स्मृतः॥ येन संशयपूर्वेषु बोद्धव्येषु व्यव
स्यति॥ अथ द्वादशके तस्मिन् सत्वं नामापरो गुणः॥२१॥ महासत्वोऽल्पसत्वो वा जंतुर्ये
नानुमीयते॥२२॥

बुद्धिस्थितमिदं स्वप्रकाशत्वलक्षणं अप्रलग्नस्य बुद्ध्यादिष्वपि मनस्त्वं वा
शयिते तेषामपि वासोपेक्षत्वमाह॥ द्वादशास्ति त्यादि नासपापपूर्वेषु बुद्धिः स्वकार्ये
निश्चयकर्तृत्वे सत्वात् द्वादशगुणात्मकं मनोपेक्षते तेन स्पष्टं व्यवस्यते निश्चिनोति मनेन्द्रियम
नोपेक्षत्वबुद्धिर्द्वादशात्मबुद्धिस्वभावोपादानसत्वेन स्वरजस्तमोभ्यां मनसानाभिभवेन ध्यानाः
विः चिदस्मि अवेमहदेतत्स्यात्मनादिके देहात्मकत्वात्मासंगविदादिकं देहात्मकत्वात्मास
गविदादि निश्चयदाता अनुमीयते ज्ञायते अन्तरार्थः स्पष्टः॥२२॥

सा

तत्त्वमहत्तमित्यादिकार्यमाह स एवेति ॥१॥ व्यक्तिकार्यमाह ऊर्ध्वमिति कालः अविद्याख्यः षोडशो गुणः अ
तिः तद्व्याप्तिर्जीवः कालसंतानस्य समष्ट्यासनामधन्या तत्त्वं तेषु नादिकालरूपत्वे प्रागुक्ते तस्य सति व्य
तिशायासंख्यातं ॥७॥ महाभूतानि द्वादश भकारो व्यतिरिक्तानि सद्भावयोगः इदन्त्वदोषस्त्रीत्वादिव्यपदे
शाहसद्भावयोगः ॥ इदन्त्वदोना स्त्रीत्वादिव्यपदेशः यद्वा अन्यान्यमविषयो सदसद्भावयोगो ज्ञेयो वि
विधिः वासना बीजं भनेोधर्मः सुक्तवासनो द्वाधकः संस्कारः बलेवाना विषयप्राप्त्यनन्तं लोयत्नः

सुखासुखे जरामृत्यू लाभालाभौ प्रियाप्रिये ॥ इति चैकोनविंशोऽयं द्वन्द्वयोगः इति स्मृतः ॥७॥ ऊ
र्ध्वं चैकोनविंशमात्कालो नाम परो गुणः ॥ इतीमं विद्धि विंशामा भूतानां प्रभवाव्ययम् ॥८॥
विंशकश्चैष संख्यातो महाभूतानि पंच च ॥ सदसद्भावयोगौ तद्गुणाश्चैव प्रकाशकौ ॥९॥
इमे च विंशकाश्चैव गुणाः सम्यक् च ये स्मृताः ॥ विधिः शुक्रं बलं चेति त्रय एते गुणाः परे ॥१०॥ विंश
तिर्दशा चैव हि गुणाः संख्याता नताः स्मृताः ॥ समग्रा यत्र वर्तन्ते तच्छरीरमिति स्मृतं ॥११॥ अव्यक्तं
प्रकृतिं तस्मात् कालानो काशश्चिद्दिष्टुति ॥ व्यक्तं वासां तथा चान्ये स्थूलदर्शी प्रपश्यति ॥१२॥

संख्यानधर्मत्वेन एतेषां ह यथाहरणं ॥१॥ विंशतिर्दशा चेति त्रिंशास्ते चातः शरीरे ॥२॥ अस्य त्रिंशकस्यो
त्पत्तौ मतांतराण्याह । अव्यक्तमिति अव्यक्तं प्रधानं प्रकृतिमुपादानं वा लानो त्रिंशात्स्थानोकाश्चि
त्तनिरीश्वरसांख्यः व्यक्तं परमाणवः चकारात् अव्यक्तं कालादृष्टेश्वरादि स्थूलदर्शी कणादादिः

443

ग्रहणमिति तत्र वासनायां तद्रूपादानभूतो गुणः त्रिगुणात्मकत्वात् संघातरूपजगदंकुरबीजभूतो वि-
यासंतत्वे गुणाः षोडशात्मिका तद्गुणाख्यं तमो ज्ञाने तद्बीजं स्वभावो धर्म्यो विभूतिः स्मृतिः सो ऽपि गुणात्मा ज्ञान
